Digitized by Arya Samaj Foundation

Digitized by Arya Samaj Foundation Chennai and eGangotri

080524

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080524

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri




COLLOSOL
ARGENTUM

...table antibiotic is virtually
... in the commonly occurring milder
...ns and for prophylaxis following
...Collosol Argentum is completely
...d w... ot expose the patient
... danger of a contact dermatitis.

...ntum presents no storage
... does not require to be kept
...or. It remains stable
...definitely.

*...14 ml. bottles (with pipette)*
*...ml. and 112 ml. bottles*

...ORIES LIMITED
*...s Limited)*
... CARNAC ROAD, BOMBAY-3

...ERRUM
*...or all ages*

...is contra-indicated or when it is
...e the haemoglobin level rapidly,
... INTRAVENOUS should be used.

*...oz. bottles: Liquid—4 oz. bottles*
*...0's and 250's:*
*...Boxes 6 x 5 ml. amps. and*
*...0 x 5 ml. amps.*


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080524
पुस्तकालय
गुरुकुल काँगड़ी

Reg. No. C 1073

Vol. XXXX. ... 57

No. 1 ... चे

४०श-वर्षस्य वैशाखे

१म संख्या मासे

भारतं ... भारती
080524

# संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः
श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थश्च

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता

वार्षिकमूल्यम्—रूप्यकषट्कम् ६।
Foreign price—1-4 d

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# विज्ञापनम्

## विशेषतो द्रष्टव्यम्

संस्कृतसाहित्यपरिषदः त्रिषष्ट्यधिकत्रयोदशशततम (१३६३) वङ्गाब्दीयं वार्षिकं मूल्यं ( Annual Subscription ) यैर्ग्राहकमहोदयैरेतावत्कालपर्यन्तं न परिशोधितं, तैः कृपया सत्वरं तत् प्रेषणीयम्। अन्यथा (V. P.) डाकयोगेन प्रेरणे व्ययाधिक्यं भविता। अतः परं यैस्तावदस्याः परिषदः सदस्यपदावस्थानं नेष्यते तैर्वयं तूर्णं विज्ञापनीयाः। इति—

विनीत—संस्कृत-साहित्य-परिषत्-सम्पादकानाम्

१६८।१, राजा-दीनेन्द्रष्ट्रीट्,

संस्कृतसाहित्यपरिषद्‌भवनम्, कलिकाता—४

## Sanskrit Sahitya Parishat Series

(Revised up to April, 1951)

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhanta-bhushan. Re. 1-4 ; Re. I. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshina-charan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kali pada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshina charan Bhattacharya. Rs. 2-8 ; out of stock.

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

(Cont. to Cover 3rd Page)

Printed by Bishnupada Bhattacharya M.A. Kabyatirtha. at Calcutta Oriental Press Private Ltd., 9, Panchanan Ghose Lane, Calcutta 9 and Published by the same from Sanskrit Sahitya Parishad, 168/1, Raja Dinendra Street, Shyambazar Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं संस्कृत-साहित्य-परिषत् प्रतिमा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

# संस्कृतसाहित्यपरिषत्

Vol. XXXX. No. 1 — १८७९-शकीये वैशाखे ४०श-वर्षस्य १म-संख्या — May 1957.

## मतिमञ्जरी

### नूतनाब्दः

[ निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः ]

परममुक्तपुरुषवद् व्यतीतः कालो न पुनरावर्तते। यद्यपि सर्वेषामेव भाविक्षणादिकालोपाधीनां नूतनत्वं तथापि तदेवोपधिभेदं बुद्धौ समाकलय्य सौरचान्द्रनाक्षत्रसावनादिभेदेनाखण्डोऽपि कालः खण्डितः। सोऽयमनादिनिधनः सङ्कर्षणाद्यात्मकः परमपुरुषो गीतोक्तः कालो लोकक्षयकृद्रूपः सर्वव्यवस्थापकः कल्याणाकल्याणविधायको जीवजगत्यां सुतरामभिनन्दनीय एव प्राणभृतां निखिलानाम्। यः शकाब्दो बहोः कालात् प्राक् प्रचलितोऽपि चलच्छक्तिहीनो जातः सोऽयमधुना नवीनकर्णधारोत्साहशक्तिभिर्नवीनायमानो नवीनमुद्रां वहन्नस्माकं पुरतस्तस्य तत्तन्नवीनं कार्यजातं विजृम्भयति। नास्ति कालस्य किमप्यसाध्यं नाम। यथायमैन्द्रजालिकवदचिन्तनीयं समुपस्थापयितुं समर्थस्तथा सुपरिकल्पितमपि फलोन्मुखमपि कृत्यनिवहं समर्थो विघटयितुम्। दृश्यते खलु वङ्गदेशे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रतिश्रुतस्य शिष्टस्य संस्कृतमहाविद्यालयस्यैकस्य तथा सर्वेभ्यः प्रदेशेभ्यः प्रथमप्रस्तावितस्य संस्कृतविश्वविद्यालयस्य प्रतिष्ठाविधिमधिकृत्य तस्य विघटनसामर्थ्यम्। न च विधिरेव प्रतिबन्धक इति वाच्यं कर्माधीनत्वेन तस्य प्रभुत्वाभावात्। सर्वेषामस्माकं संस्कृतप्रणयिनां प्रियतमः स्वनाम-प्रसिद्धो डक्टर-विजनकुमारमुखोपाध्यायमहोदयः कालकवलं नीतः— अपि तेन समारब्धं राष्ट्रप्रतिश्रुतमन्ततः एकस्य संस्कृतमहाविद्यालयस्य प्रतिष्ठापनमपि तेन समं कवलीकृतं कालेन ? अपि नाम दौर्भाग्यादस्माकं भारतीयानां संस्कृतशिक्षामधिकृत्य कालस्यैवं विपरीतविलसितम् ? शृण्वन्तु विश्वे अमृतस्य पुत्राः ! यैरेव शास्त्रैः संस्कृतवाङ्मयोपनिबद्धैरमृतस्य वाणी प्रचारिता सेयमिदानीं यद्युपेक्षिता स्यात् तदा कुतोऽमृतत्वं—कुतः शान्तिः ? अस्माभिः कतिपयैरेव संस्कृतानुरागिभिर्यत् सत्यमित्युद्घोष्यते तदेवान्यैः संस्कृतविरागिजनैर्निरन्तरं समुपेक्ष्यते। गणतन्त्रीये राष्ट्रे संख्यालघूनां क्व स्थानम् ? अथ चास्माभिरेवं दृश्यते संस्कृतानुशीलनं विना न नैतिकी शिक्षा पदं लप्स्यते—नीतिशिक्षां विना न कथञ्चिदप्युन्नतेः सम्भावना राष्ट्रस्य। अत एवाघटनघटनपटीयान् कालः समभ्यर्च्य नीयः—प्रार्थनीयश्च।

अक्षैरक्षजितो रणे परिभवो राज्यात् परिभ्रंशनं
देवस्य भ्रमणं वनेऽतिगहने भ्रात्रा च पत्न्या समम्।
पुण्यश्लोकमहात्मनां विधिवशाद् दौर्भाग्यजातं स्मरन्
शङ्के कालगतिर्विचित्रविभवा निन्दास्पदं वा न वा॥
सर्वे यस्य वशं गताः क्षितितले संप्राप्नुवन्ति क्षयं
यः सर्वप्रभवः प्रभुर्न भगवान् यस्योपरि भ्राजते।
धर्मग्लानिवशादशान्तवसुधाशान्त्यर्थमभ्युन्नतं
सर्वेभ्यो बलवत्तरं चिरनवं कालं नुमः शाश्वतम्॥

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वङ्गीयसंस्कृतशिक्षापरिषदः समावर्तनोत्सवे

परिषत्सभापतेः

माननीयविचारपति-न्यायभारती-श्रीप्रशान्तविहारि-

मुखोपाध्यायमहोदयानाम्

# अभिभाषणम्

(पूर्वतोऽनुवृत्तम्)

येषां प्राचीनविश्वविद्यालयानां शतवार्षिकमहोत्सवः सम्प्रयसमाभिरनुष्ठितः, ते विश्वविद्यालयाः संस्कृतशिक्षायाः प्रसारे वृद्धौ च प्रभूतां सहायतामकुर्वन। विद्यालयशिक्षायाः समाप्तिं यावत ते संस्कृतशिक्षाम् आवश्यकीम् अकार्षुः। ततफलतया बहवश्छात्राः शिक्षकाश्च संस्कृतसाहित्येष्वनुरागवन्त आसन। परम्, दौर्भाग्यात विषयेऽस्मिन् नूतना काचन व्याघातसृष्टिरभूत। राष्ट्रभाषा-प्रादेशिकभाषयोर्विरोधेन देशः प्लावितः। विस्मृतवन्तश्च वयं यत, येयं राष्ट्रभाषा याश्चेमाः प्रादेशिक्यो भाषास्तासां सर्वासामेव प्रायेण संस्कृतमेव मातृभूतभाषेति। विश्वविद्यालयेषु, किमधिकं साधारणविद्यालयेष्वपि नेदानीं संस्कृतशिक्षा आवश्यकतया वर्तते! ततफलेन च अस्मद्देशीयाश्छात्राः संस्कृतशिक्षायां नानुरक्ता वर्तन्ते। सन्ति चाद्यत्वे तथाविधा अपि केचन विद्यालयाः, येभ्यः संस्कृतशिक्षायां सर्वेऽपि प्रबन्धाः प्रत्याह्रियन्ते। छात्रा विश्वविद्यालयादुपाधिं गृहीत्वा निर्यान्ति, परं तेषां नैकेषामेव संस्कृतसाहित्यस्य संस्कृतभाषायाश्च अपूर्वदानभूतैः रामायण-महाभारत-पुराण-धर्मग्रन्थादिभिः सह परिचयो नास्ति। अपरतश्च देशे ये तावत प्राचीन-पाठशाला-चतुष्पाठ्यादय आसन—परिपोषकाणाम् अन्तर्धानेन तेषाम् आर्थिको समवस्था नितरां शोचनीया संवृत्ता। छात्राभावः शिक्षकाभावः पाठ्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पुस्तकाभावो धनाभावश्चेति सर्व एवाभावा युगपत प्रबलीभूता वर्तन्ते। एकतो यथा पश्यामो भारतीये शिक्षाकाशे संस्कृतसाहित्यस्य संस्कृतभाषायाश्च अध्ययनालोचनयोर्नवनवं सुयोगोन्मेषम, अपरतः पुनः पश्यामः संस्कृत-शिक्षायाः परिपन्थिभूताम् आधुनिकीं परिस्थितिम्। संस्कृतशिक्षाया विघ्नापसारणस्य कालोऽद्य समुपस्थितः।

अद्यत्वे देशे विशेषतस्तादृश्यवस्था समुपस्थिता, यत्र संस्कृतशिक्षायां संस्कृताध्ययने च सर्वाङ्गीणदृष्टेः सर्वाङ्गीणकर्मपद्धतेश्चावलम्बनम् एकान्ततः प्रयोजनीयं मन्ये। यतः, पश्यामि—असमग्रया दृष्ट्या असमग्रं संस्कारं कर्तुमुपक्रममाणस्य हितादहितम् उत्पद्यते। केवलम् अन्धविश्वासम् आश्रित्य संस्कृतशिक्षायाः संस्कारो न भवेत्। पक्षान्तरे पुनरवज्ञया चेष्टाशून्यत्वेऽपि न सम्भवेदुन्नतिः संस्कृतशिक्षायाः। प्राचीनपद्धतिम् अनुसरन्ति शिक्षाकेन्द्राणि पाठशाला-चतुष्पाठ्यादीनि वर्तमानयुगोपयोगीनि कर्तव्यानि। तया शिक्षया सह वर्तमानकालीय-जीवनधारायाः संयोगः पुनः प्रत्यानेयः। तस्य च कर्तव्यत्वे प्राथम्येनास्माकम् इदमेव कर्तव्यं यत, तेषां पाठ्यविषयाणां सीमाया विस्तृतिः कर्तव्या। काव्य-व्याकरण-दर्शन-वेद-तन्त्रादिभिः सह आधुनिककालोपयोगिनः केचन विषयाः, यथा गणित-भूगोलेतिहास-सरलाङ्गल-भाषाः—संस्कृत-शिक्षापाठ्य-सूच्यन्त-र्गताः करणीयाः। अद्यत्वे कूपमाण्डूक्यं सर्वथा परिहर्तव्यम्। अस्माकं जातीयैः प्रतिष्ठानसमूहैर्जगतो भावधारया सह सम्बन्धो रक्षणीयः। अस्माकं द्वितीयं वक्तव्यं, यदतीतेऽपि वर्षे मयोक्तं, तत पुनरिदम्—चतुष्पाठ्यो देशस्य प्राथमिकशिक्षाकेन्द्ररूपेण विपरिणमयितव्याः। अस्मिन विषये भूयोऽप्यहं राष्ट्राधिकारस्य दृष्टिम् आकर्षामि।

साम्प्रतिके काले संस्कृतभाषया लिखिता वङ्गभाषयाऽनूदिता वा ये ये ग्रन्थाः प्रकाशिता मम दृष्टिपथम् आगतास्तेषु द्वावेव ग्रन्थौ विशेषत उल्लेखयोग्यौ। तयोरेकः—पण्डितस्य ईश्वरचन्द्रशास्त्रिणो "धनुर्वेदः"। अल्पायतने अस्मिन पुस्तके शास्त्रिमहोदयेन भारतीयम् अपूर्वं युद्धविज्ञानं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



युद्धशास्त्रञ्चाधिकृत्य कृता गवेषणा। यजुर्वेदात् एतदुपयोगि ज्ञानमाकलय्य जनानां दृष्टिगोचरतां नीतम्। अस्त्रादीनां व्यूहरचनायाश्च यावन्ति चित्राण्यत्र प्रकाशितानि, तान्यवलोकयताम् अस्मद्देशवासिनां दर्शनस्य कूटतर्कमात्रं मत्वा संस्कृतसाहित्यम् अवधीरयतां विचारः सिद्धान्तश्च परिवर्तितौ भवेताम्, इत्यहमाशासे। अपरश्च ग्रन्थः स्वामि-प्रत्यगात्मानन्द-सरस्वत्या विख्यातं "जपसूत्रम्"। अत्युन्नतधारया मौलिकी आलोचना ग्रन्थेऽस्मिन् प्रकाश्यते। ईदृशी आलोचना, गभीरज्ञानस्य गभीराया अनुभूतेश्चैतावान् विकाशो मया स्वल्प एव दृष्ट इति मे क्षुद्रबुद्धेर्विचारः। सागरस्येवास्य ग्रन्थस्य विस्तारो गभीरता च। संस्कृतभाषया सूत्रं विरचितं वङ्गभाषया च व्याख्यानं दत्तम्। ताविमौ ग्रन्थौ संस्कृतभाषाया विशेष-विज्ञानस्य द्वारम् अपावृणुताम्। देशवासिनः सज्जनान् पण्डित-गणांश्चानुनयामि ग्रन्थयोरनयोः सादराभ्यर्थनाय।

उपसंहारे च ममैतद् वक्तव्यं यत्, विगतवर्षीयाणां परिषत्परिचालि-तानां परीक्षासमूहानां फलं सन्तोषावहम् अभवत्। प्रश्नपत्रविरचनविधौ तदुत्तरविधौ च वयं क्रमोन्नतिपथेऽग्रगामिनो वर्त्तामहे। इतोऽप्यस्य समुन्न-तिरस्माभिराशास्यते। परम् अत्र समुन्नतिपथे वयं काश्चन प्रतिबन्धकता अनुभूतवन्तः। तासु च विशेषेण समुल्लेखमर्हति प्रायेण पाठ्यग्रन्थानां दुर्लभता, प्रश्नपत्रशोधकानाम् उत्तरपत्रपुनःपरीक्षकाणाम् अभावश्च। यथेयं प्रतिबन्धकता नचिराद् दूरीभवति तदर्थं परिषदियं यत्नपरा वर्तते।

ये हि छात्राः परीक्षायां साफल्यम् अधिकृतवन्तः, विशेषतो ये उपाधिम् उपार्जितवन्तः, अहं स्वपक्षतः संस्कृतशिक्षापरिषत्पक्षतश्च तेभ्यः सानन्दम् अभ्यर्थनां वेदयामि। यथा ते संस्कृतशिक्षायाः संस्कृतसभ्यतायाश्च गौरवम् अक्षुण्णं कर्तुं शक्नुयुस्तदर्थमहं प्रार्थये, आमन्त्रये च संस्कृतशिक्षायाम् उपाधिप्राप्तान् स्नातकान् संस्कृतस्य शिक्षा-सभ्यतयोर्दीप्तान् आदर्शान् स्मर्तुम्। भो यूयं तस्यां सभ्यतायां दीक्षिताः सन्तानाः नवोदयमानस्य युगस्य पताकावाहकाश्च। युष्माकं जीवनयात्रया युष्माकम् आदर्शनिष्ठया च तथा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भवितव्यं यथा तद्दर्शनेन सर्वे देशाः सर्वे समाजा भारतीय-जातीयप्रति-भाया रूपं पश्येयुः, अनुप्राणिताश्च भवेयुर्नवनवया प्रेरणया—इयं मे प्रत्याशा। नेदं विस्मर्तव्यं यत्, यः किलादर्शः संस्कृतसभ्यतायाम् अन्तर्लीनो वर्तते, केवलं स एवास्मिन् जगति शान्तिं प्रत्यानेतुं शक्नोति, शक्नोति च मानवसमाजं कल्याणपथे प्रतिष्ठाप्य वस्तुतः समर्थं कर्तुम्। यूयं जीवनयात्रायां यथार्थं जयं लभध्वं, सार्थकाश्च भवतेत्ययमेव पारिषद आशीर्वादः।

---

# नववर्षाभिनन्दनम्

निबन्धकः—अध्यापक-श्रीदुर्गादासगोस्वामी, एम. ए. साहित्यशास्त्री

एह्येहि भोः करुणया नववत्सर ! त्वं
स्वागच्छ नः प्रकटसङ्कटभाजि विश्वे।
विस्तारयन् प्रतिदिशं नवजीवनाशा-
वाणीं शिवामपि ददत् सुखशान्ति-लक्ष्मीः ॥१

आवर्तनैर्विरचयंश्चलकालचक्रं
कल्पान्-युगान्यपि समायनमासपक्षान्।
रात्रीर्दिनान्यपि च दण्ड-मुहूर्तकादी-
नद्य क्रमादुपनयत्यपरं नवाब्दम् ॥२

स्वेनौजसा शिशिरकुज्झटिकामुदस्यन्
मह्यां यथा स्फुरति वैभववान् वसन्तः।
आविर्भवत्यपि तथा विगताब्दखेद-
ग्लानिं विधूय महसा नववत्सरो नः॥३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



छाया यथोदयवतस्तपनस्य पृष्ठे
तिष्ठत्यपि प्रमुखतस्तरुणातपश्च।
एवञ्च नः प्रचितदुर्गतिरस्तु पश्चा-
दग्रे पुनर्नवनवोऽभ्युदयप्रपञ्चः॥४

पुण्ये क्षणे तदिह नूतनवत्सरादौ
देवानृषीनपि गुरून् प्रणिपत्य भक्त्या।
प्रीत्यैकतानमतयो वयमद्य कुर्मः
सङ्कल्पमस्य जगतः सुखशान्तिवृद्धैय॥५

सर्वत्र मानवगणाः सुखिनो यथा स्युः
श्रीस्वास्थ्यमङ्गलजुषः पुरुषार्थभाजः।
अस्माभिरुद्धृतपुरातनमन्युशल्यै-
रद्य प्रभृत्यपि तथा यतितव्यमुर्व्याम्॥६

पृथ्वीतिवृत्तनिकरादधिगम्य शिक्षां
प्राणप्रदां विषमसङ्कटतारिणीञ्च।
भूतान् गुणान् वयमतः प्रतिगृह्य तांस्तान्
दोषानपास्य च नवं रचयाम विश्वम्॥७

यत् स्यादशोकमभयं रहितं जराद्यै-
रातङ्कसंशयघृणाहननैतिशून्यम्।
आदर्शरूपमतुलं चिरमुक्तमोक्ष्यं
वाणिज्यशिल्पकृषिभिः सफलं तथाढ्यम्॥८

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# शोकसंवादः

नूतनाब्दे शुभसूचकं किञ्चिद्विज्ञापनीयम्, किन्तु दौर्भाग्यादस्माकं तद्विपरीतमतीव परितापजनकं पण्डितरत्नत्रयाणां महाप्रयाणं शोकभारातिलाभाय समविषण्णेभ्यः परिवेश्यते ;—

१। त्र्यशीतिवर्षवयस्का वरिशालमण्डले लब्धजन्मानः संस्कृतसाहित्ये वेदान्ते च विशेषतो व्युत्पन्ना विविधविद्वद्गुणमण्डितास्तीक्ष्णधियो ৺वनमालिवेदान्ततीर्थ एम. ए महोदयाः प्रवीणे वयसि यद्यपि दिवं गतास्तथापि तद्वियोगेन संस्कृतसेवाव्रतिनो वयं नितरां विमूढा जाताः। त इमे कलिकाताराजकीयसंस्कृतमहाविद्यालये टोलविभागे वेदान्तशास्त्राध्यापका अपि "एफ्" "ए" श्रेण्यां न्यायशास्त्रमध्यापयन्तस्तरुण एव वयसि सविशेषामध्यापनाख्यातिमलभन्त। तेषां च रिक्तं स्थानं संस्कृतजगति चिरमपूरणीयं स्थास्यतीति संस्कृतसेवकानां महादुःखकारणमिति।

२। पञ्चषष्टिवर्षवयस्काः प्रतिभासम्पन्नाः संस्कृतसाहित्ये न्यायदर्शने चातीव प्रवीणा ৺अमरेन्द्रमोहनतर्कतीर्थमहोदया विश्वकविरवीन्द्रनाथस्य कतीनां वङ्गवाङ्मयपद्यानां मनोरमं संस्कृतानुवादं विधाय प्रणीय च "न्यायपरिभाषा" नामधेयं पुस्तकं समालोच्य च संस्कृतभाषाया राष्ट्रभाषाभवनयोग्यतां साहित्यरसिकानां दुरूहन्यायशास्त्रप्रविविक्षूणां संस्कृतसमाजस्य च प्रीतिं जनयन्तः ख्यातिविशेषानप्युपार्जितवन्तः। तदेतेषां महाप्रयाणेनापि संस्कृतसमाजस्य या क्षतिर्जाता साप्यपूरणीया एवेति।

३। सप्ततिवर्षवयोदेश्या गवेषणानिष्णाता नीरवकर्मजीवनयापनकुशला डक्टर ৺दीनेशचन्द्र भट्टाचार्य एम, ए महोदया अन्तिमेऽपि वयसि संस्कृतपरिपालनव्रते निमग्नाः सहसा दिवं गताः। स्थलविशेषे मतभेदसत्त्वेऽपि "वङ्गे नव्यन्यायचर्चा"भिधेयो ग्रन्थश्चिरमेतेषां गवेषणकुशलतायाः साक्ष्यं प्रदास्यतीति। सर्वेषामेषामात्मानः शोकविधुराः परिजनाश्च गुणोत्कर्षं स्मरन्तः कथञ्चित् शान्तिं जगच्छरण्यस्य शरणञ्च लभन्तामिति काम्यते।

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# स्वातन्त्र्य-सन्धिक्षणम्

[ निबन्धकः—श्रीश्रीजीवन्यायतीर्थः, एम.ए. ]

नान्दी ।

दीर्घदामदुरवापबन्धनो मन्दहासरुचिसुन्दराननः ।
मातुरङ्कगतवन्दिभावनो नन्दनन्दन इदं सदोऽवतु ॥

नान्द्यन्ते सूत्रधारः । अलमतिप्रसञ्जनेन । अस्मिन संस्कृतपरिषदो वार्षिकाधिवेशनशुभक्षणे विचक्षणमनःप्रीणनाय किमप्यभिनवरूपकमभिनेतव्यमिति सन्दिष्टोऽस्मि । तद् यावद् विदूषकमाह्वयामि । वयस्य ! वयस्य ! वयस्य !

प्रविश्य विदूषकः । आः अजाणिअ मे कज्जगोरअं केअलं आआरेसि वअस्स वअस्स वअस्सेति ।

[ आः अज्ञात्वा मे कार्यगौरवं केवलम् आकारयसि—वयस्य ! वयस्य ! वयस्येति ।

सूत्र० । वयस्य ! कीदृशस्ते कार्यगरिमा ।

विदू० । इदो पेक्खदु, प्पादरासो सज्जिदो ।

[ इतः पश्यतु, प्रातराशः सज्जितः । ]

सूत्र० । अहो ? महदिदं कार्यम् ।

विदू० । कधं णाम पड़िहससि ? किं ण आणासि ?
प्पच्चूसे भअवन्नाम सुहापाणस्स गोरअं ।
अज्जिदं प्पादरासस्स रसलम्पड़जोहया ॥

[कथं नाम परिहससि ? किं न जानासि ?
प्रत्यूषे भगवन्नामसुधापानस्य गौरवम् ।
अर्जितं प्रातराशस्य रसलम्पटजिह्वया ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सूत्र० । पूर्वकाले प्रातराशः स्थितो रक्षःकुलप्रियः ।
इदानीं राक्षसी वृत्तिरहो साधारणीकृता ॥

तत्र जगद्ग्रासलोलुपानां श्वेताङ्गपुण्यजनानां शिक्षागुणो विशेषात् प्रभवति ।

विदू० । भाव ! अत्थकल्लवत्तस्स किदे वाराङ्गणेव्व प्पादरासस्स किदे रसणा मे णच्चइ । ता तुलिदं कधेहि किं मए कज्जं त्ति । [भाव ! अर्थकल्यवर्त्तस्य कृते वाराङ्गणेव प्रातराशस्य कृते रसना मे नृत्यति । तत् त्वरितं कथय किं मया कार्यमिति ।

सूत्र० । वयस्य ! कर्त्तव्यविमूढोऽस्मि । इतस्ते प्रातराशः सज्जितः, इतश्च प्रातःस्मरणीयाः सुधियः साग्रहमुत्तकर्णपुटास्त्वदीयाभिनयरसपिपासयाऽपेक्षन्ते ।

विदू० । भाव ! तुमं ज्जेव विआलेहि—अत्तकेलिआ वुभुक्खा आदु परकेलिआ पिआसा, कदरा वलीअसीत्ति ।

[भाव ! त्वमेव विचारय—आत्मीया बुभुक्षा उत परकीया पिपासा कतरा बलीयसीति ।

सूत्र० । विचारे तवैव स्वातन्त्र्यं दीयते मया ।

विदू० । भोदु चिन्तेमि—णं इदो अत्तकेलिया वुभुक्खा, तदो अ परकेलिआ पिपासा । इमस्सिं भावजुअलस्स सन्धिक्खणे स्सतन्तत्तदो ण पारेमि णिच्चेदुं । (इति चिन्तां नाटयति )

[भवतु चिन्तयामि—ननु इत आत्मीया वुभुक्षा ततश्च परकीया पिपासा, अस्मिन् भावयुगलस्य सन्धिक्षणे स्वातन्त्र्यतो न पारयामि निश्चेतुम् ।

सूत्र० । अलमलं चिन्तया । स्मारितोऽस्मि वयस्यवचनेन यत स्वातन्त्र्यसन्धिक्षणं नाम रूपकमेव साम्प्रतं प्रयोक्तव्यमिति ।

विदू० । जधा दे रोअदि । भो पुच्छामि केण प्पणीदं एदं रूवअं ।
[यथा ते रोचते । भोः पृच्छामि—केन प्रणीतमेतद् रूपकम् ]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


सूत्र० वङ्गेषु गङ्गातटपूर्वसीम्नि या भट्टपल्ली सुरवल्लिकल्पा ।

तस्याः प्रसूतेषु सुतेषु रत्नमाचार्यपञ्चाननतर्करत्नम् । तदात्मजेन श्रीश्रीजीवशर्मणा साम्प्रतं विनिर्मितमिदं रूपकं त्वया सुविदितमपि कथं विस्मर्यते ?

विदू० । ण क्खु अच्चरीअं मे मुरुक्खस्स विसुमरणं ।

पङ्कमज्झे जधा क्खित्तं णाणअं झत्ति मज्जइ ।
जड़चित्ते तहाह्माणं किम्पि कव्वं ण भासइ ॥

[ न खलु आश्चर्यं मे मूर्खस्य विस्मरणम् ।

पङ्कमध्ये यथा क्षिप्तं रत्नं झटिति मज्जति ।
जड़चित्ते तथास्माकं किमपि काव्यं न भासते ॥

सूत्र० । चिरं परिचिताप्येषा कृतिर्हास्यरसा त्वया ।
हन्त भो विस्मृता नव्यैर्यथेयं प्राच्यसंस्कृतिः ।

इति प्रस्तावना ।

---

## माणवक-गौरवम्

[ निबन्धकः—श्रीकाश्यपकविः ]

( पूर्वानुवृत्तम् )

### सप्तमाङ्के

पञ्चमदृश्यपटः

( ततः प्रविशति पत्न्या सहित आसनस्थो धौम्यः ) ।

पत्नी—आर्यपुत्र ! सुचिरं वत्समुपमन्युमपश्यन्ती सुमहद् दुःखमनुभवामि । तत् कथयतु भवान कदा नु खलु श्रीमन्तमायुष्मन्तं दृष्टवती सुखिनी भवेयम ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



धौम्यः—प्रिये ! जानामि यद् वत्सलचरिता त्वं नियतमेव वत्सस्योपमन्योरुत्कण्ठमाना विषण्णासि, तथापि तस्यैव हिताय कालः प्रतिपालयितव्यः ।

पत्नी—आर्य्यपुत्र ! सुचिरः खलु कालो व्यपेक्षणीयो मन्त्रपुरश्चरणाय तत् कथं तावान् मया सोढ़व्यः ?

धौम्यः—प्रिये ! अलमत्याकुलतया, मनो मे दृढं ब्रवीति, यन्नूनमचिरेणैव कालेन वत्सं सिद्धकामं द्रक्ष्यसि ।

पत्नी—भवतु, भवतु, एवमेव देवताप्रसादाद् भवतु ।

(नेपथ्ये—उपमन्युः—आर्य कात्यायन ! सातिशयमुत्कण्ठितं मे हृदयं भगवतो गुरोः भगवत्याश्च अम्बायाः पादवन्दनाय । तत सत्वरं व्रजत्वार्यः ।

कात्यायनः—वयस्य ! अलमत्युत्कण्ठया । एतौ नातिदूर एव दृश्येते भगवानम्बा च

उपमन्युः—एवं ननु ? तदुज्जीवितोऽस्मि ।

धौम्यः—प्रिये ! दिष्ट्या वर्द्धसे । कुतः ?

मनोरथस्ते मधुरश्चिरन्तनः
वत्सोपमन्योर्मधुराकृतिं श्रितः ।
कात्यायनेनैति भवत्पदान्तिकं
दृष्ट्वा तमासाद्य शान्तिमुत्तमाम् ॥

पत्नी—आर्यपुत्र ! क नु क नु खलु मे वत्स उपमन्युः ?

धौम्यः—प्रिये ! क्षणादुत्तरमिहैव द्रष्टव्यः । ( नेपथ्याभिमुखमवलोक्य ) अये ! किन्नु खल्विदम् ?

उत्फुल्लभावः किल वत्सयोर्मे
कृत्यस्य सिद्धिं वदति प्रकामम् ।
तथापि कात्यायनहस्तलम्बी
वत्सोपमन्युः किमुपैति मन्दम् ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भवतु, पश्यामि तावत्

( ततः प्रविशति कात्यायनेन सह उपमन्युः । )

कात्यायनः—वयस्य ! उपमन्यो ! सन्निहितावेतौ नो मातापितरौ, तदभिवन्दस्व ।

उपमन्युः—भगवन् ! एष उपमन्युः प्रणमति ।

धौम्यः—वत्स ! सर्वतः कुशली भव ।

उपमन्युः—भगवत्यम्ब ! एष ते उपमन्युः प्रणमति ।

पत्नी—एहि मे वत्स ! चिरमनामयं जीव ।

उपमन्युः—उभाभ्यामनुगृहीतोऽस्मि ।

पत्नी—अहो ! वत्सस्योपमन्योरियमवस्था जाता । आर्यपुत्र ! वत्समुपमन्युमीदृशं समीक्ष्य विदीर्यते मे हृदयम् । हा ! हा ! ( रोदिति ) ।

धौम्यः— दुर्बला प्रकृतिः स्त्रीणां नाघातं सहतेऽल्पकम् ।
का कथा स्नेहपात्राणां तादृशानां महापदः ॥

अत एवादौ नानुमतं मया वत्सस्योपमन्योरस्याः समीपे गमनम् । प्रिये ! स्थिरा भव, किमेवमाकुलासि ?

यथाविधि कृतं कर्म फलमिष्टं प्रयच्छति ।
उपमन्योः क्रिया वैधी कथं नेष्टाय कल्पताम् ॥

पत्नी—आर्यपुत्र ! तथापि कथं नोपमन्योरान्ध्यविनिवृत्तिः ?

धौम्यः—प्रिये ! ममाप्यस्ति सेयं जिज्ञासा । तद् यावत् पृष्ट्वा तत्त्वमवधारयामि । वत्स ! उपमन्यो ! अपि केनचित् प्रत्यूहेन व्याहतं ते पुरश्चरणम् ?

उपमन्युः—शिष्याणां कल्याणाय निरन्तरं जागरूके भगवति कुतः प्रत्यूहस्य प्रसरः ?

( क्रमशः )

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# वेदान्तविमर्षः

( प्रथमभागः )

[ निबन्धक :—श्रीचारुकृष्णदर्शनाचार्यः ]

( पूर्वानुवृत्तः )

न च श्रवणस्य साक्षात्कारहेतुत्वं मनःशुद्धिहेतुत्वं वा श्रुत्या प्राप्तम् । "दृश्यते त्वग्रया बुद्धया सूक्ष्मया सूक्ष्मदर्शिभिः" "मनसैवानुद्रष्टव्यम्" "ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमान" इति श्रुतिभ्यः,

"ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥"

इति स्मृतेश्च ध्यानादिपरिशोधितमनस एवात्मदर्शनहेतुत्वप्राप्तेः । बुद्धेरग्रयत्वं च पापराहित्येन रागादिवैधुर्यं, तादृशमनःसम्पत्तौ च सन्नयासिनां ध्यानस्यैव हेतुत्वं "ज्ञानप्रसादेन विशुद्धसत्त्व" इति श्रुते रन्येषां च कर्मणां नित्यनैमित्तिकानां, "यज्ञेन दानेन तपसाऽनाशकेन" "पुण्येन पापमपनुदती"ति श्रुतिभ्याम् "यज्ञो दानं तपश्चैव पावनानि मनीषिणामि"ति स्मृतेश्च । क्लृप्तं चेन्द्रियस्यैव साक्षात्कारकरणत्वं "दर्शनाय चक्षुः गन्धाय घ्राणं मनोऽस्य दैवं चक्षुः स वा एष एतेन दैवेन चक्षुषा मनसैतान् कामान् पश्यन् रमते" "दृश्यते त्वग्रयया बुद्धया" "मनसैवानुद्रष्टव्यमि"ति श्रुतिभ्यः । चक्षुषा पश्यति घ्राणेन जिघ्रति श्रोत्रेण शृणोतीति लोकाच्च । न च शब्देन पश्यतीति । निराकरिष्यते-चोपरिष्टात वृत्तिचैतन्यविषयचैतन्ययोरभेदस्य प्रत्यक्षहेतुत्वम् । दर्शयिष्यते च मनस इन्द्रियत्वम् । प्रोक्तं च श्रवणं गुरुमुखात सर्गादिकर्तुरात्मनो ग्रहणम्, न तु विचारः अतिगौरवात, यथाह श्रुतिः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



"तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय।

येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्॥

इत्युक्त्वा—तदेतत् सत्यं यथा सुदीप्तात् पावकात् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः।

तथाऽक्षराद् विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापियन्ति॥

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।

खं वायुर्ज्योतिरापश्च पृथिवी विश्वस्य धारिणीत्यादि॥

श्रवणपदस्य विचारपरत्वे तेनैव निष्कृष्टार्थावगतेर्मननवैयर्थ्यापत्तेः, विनैव विचारं गुरुमुखान्निर्व्यूढार्थग्रहणेऽपि सांख्यादिकल्पितविरुद्धव्याख्याश्रवणान्न निष्कम्पप्रवृत्तिः शिष्याणामिति मननापेक्षा मननेन च प्रवृत्तेर्दार्ढ्यम्। विचारो नामोहापोहरूपो मानसव्यापारः, स च "सोऽन्वेष्टव्यः स विजिज्ञासितव्य" इति जिज्ञासाश्रुतेर्विषयः जिज्ञासापदस्य विचारे प्रसिद्धत्वात् यथाहुः पूर्वतन्त्रविदः "धर्मं जिज्ञासितुमिच्छेत्" "क्रत्वर्थपुरुषार्थौ जिज्ञास्येते" इति।

न च शब्दादपरोक्षं 'दशमस्त्वमसी'ति न्यायस्याप्रामाण्यादिति दर्शितं सूत्रभाष्ये,

"न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा"।

"नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन।"

इत्यादि श्रुतिभिः कण्ठत एव शब्दादिप्रतिषेधेन विशुद्धमनोमात्रदृश्यत्वमुक्तं ब्रह्मणः "ज्ञानप्रसादेन विशुद्धसत्त्व" इतीति शब्दस्य ब्रह्मसाक्षात्कारहेतुत्वाप्राप्तेर्न श्रोतव्य इति नियमविधिः सम्भवति। "दृश्यते त्वग्र्यया बुद्ध्या" "मनसैवानुद्रष्टव्यम्" "ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमान" इतिवत् शब्देनात्मा दृश्यते इति श्रुत्यभावात् प्रत्युत प्रतिषेधाच्च नात्मापरोक्षजनकत्वं शब्दस्य सत्यां च तादृशश्रुतौ यथाकथञ्चित् तत्प्रकारोऽकल्पयिष्यत; तदुक्तं "नातिभारोऽस्ति नो बुद्धेः शास्त्रं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



चेत् तत्परं भवेदिति। श्रुतिसूत्रयोरभावात् मायावादिनामेव बहूनामनभ्युपगमाच्च शाब्दापरोक्षवादः प्रवादमात्रम्। "आवृत्तिरसकृदुपदेशादि"ति सूत्रे च ध्यानस्यैवावृत्तिरुक्ता न श्रवणस्य, "निदिध्यासितव्य" इति श्रुतौ नीत्युपसर्गात् "मत्वा च सततं ध्येय" इति स्मृतौ च सततशब्दात् ध्यानस्यैवावृत्तिप्राप्तेः।

न च रत्नादिदर्शनवत् कश्चित् स्वत एव प्रवर्त्तते जीवे "पश्चादिभिश्चाविशेषादि"त्युक्तेः, अध्ययनमात्रात् प्रवृत्तिश्चेज्जीवे तर्हि न ततो निर्विशेषब्रह्मावगम इति न निर्विशेषब्रह्मावगमार्थं सावधानप्रवृत्तिः, अध्ययनमात्रान्निर्विशेषब्रह्माकर्णने च

"देवैरत्रापि विचिकित्सितं पुरा न हि सुज्ञेयमणुरेष धर्म्मः"

"क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत् कवयो वदन्ति" "यन्मनो न मनुते" "नैषा तर्केण मतिरापनेया" "अवाङ्मनसगोचरम्" इति शास्त्रेभ्यश्चात्मनोऽतिदुर्गमत्वावगमान्न स्वतो मनःप्रवृत्तिः कस्यचिदिति दुरवगाहनिर्विशेषब्रह्मावगमाय स्वतः सावधानं मनसः प्रवृत्तिमकृत्वा वेदान्तश्रवणादावेव प्रवर्त्तेत श्रवणादिभिश्च विशुद्धस्य मनसः साक्षात्कारसाधनत्वमुक्तश्रुतिभ्य एव प्राप्तमिति न वेदान्तश्रवणे प्रवृत्तिः पाक्षिकीति ज्ञेयम्। तण्डुलनिष्पत्तेश्चातिसुकरत्वान्नखविदलने प्रवृत्तिर्युक्तैव।

अधीतवेदान्तस्य "इदं सर्व्वं यदयमात्मे"ति ज्ञानेऽपि "जुष्टं यदा पश्यत्यन्यमीशमि"तिदर्शनाद् भिन्नात्मज्ञानान्मुक्तिभ्रमश्चेत् तदा शतशः श्रवणेऽपि द्वासुपर्णा सयुजा सखाया" "रसो वै स रसं ह्येवायं लब्ध्वानन्दी भवती"त्यादिदर्शनानादविरुद्धतर्कस्याप्युदयात् नैयायिकादिवत् द्वैतभ्रमो न निवर्त्तते इति व्यर्थो नियमविधिः। अस्माकं तु गुरुमुखादेव श्रद्धातः श्रवणान्मननाच्च स निवर्त्तते इति।

( क्रमशः )

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# १८७८ शकाब्दीयसंस्कृत-साहित्य-परिषत्पत्रिकास्थ-विषयानुक्रमणी

( वर्णक्रमानुसारिणी )


| निबन्ध-नाम | निबन्धक-नाम | पत्रसंख्या |
|---|---|---|
| अभिभाषणम् | | |
| | विचारपति-न्यायभारती-श्रीप्रशान्तविहारिमुखोपाध्यायः | १८२ |
| आधुनिकसंस्कृतविलासे आक्षेपः | | |
| श्रीयादवेन्द्रनाथराय न्यायतर्कतीर्थः | | १६३ |
| उन्मत्ता-श्रीपराशरभट्टाचार्य्यसाहित्याचार्य्यः | | ७५, ८८, ६६ |
| गङ्गाष्टकम् | | |
| | श्रीदुर्गादासगोस्वामी एम ए, साहित्यशास्त्री | ११५ |
| गयातर्पणम् | | |
| | श्रीहरिपदकाव्यस्मृतिमीमांसातीर्थः | ३ |
| गीर्वाणवाण्या जययात्रोद्घोषणम् | | |
| | श्रीताराप्रसन्नतर्कतीर्थः | १४६ |
| गोविन्दाष्टकम् | | |
| | श्रीदुर्गादासगोस्वामी एम ए साहित्यसास्त्री | ७३ |
| ग्रन्थसमालोचना | | ४४, ६७ |
| ,, | श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः | १६५, १६१ |
| चैतन्यचरितामृतसंस्कृतानुवादः | | |
| | श्रीभास्करानन्दस्वामी | १४, १९ |
| तथागतस्वागतम् | | |
| | श्रीदुर्गादासगोस्वामी एम ए, साहित्यशास्त्री | १३१ |


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri




| निबन्ध-नाम | निबन्धक-नाम | पत्रसंख्या |
|---|---|---|
| पूर्वमीमांसायां परमेश्वरः स्वीकृतो नास्ति | श्रीनारायणचन्द्रगोस्वामी एम ए | १७१ |
| मतिमञ्जरी | श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः | ३३, ४६, ६५, ८१, ९७, ११३, १२९, १४५, १६१, १७७ |
| मनोः प्रवचनानि | श्रीचपलाकान्तभट्टाचार्य्यः एम ए, वि एल् | ४२, ५१ |
| महाजनसमागमः | | १५० |
| माणवकगौरवम् | श्रीकाश्यपकविः | १०, २७, ४६, ५९, ६९, ८५, १००, १२१, १३५, १५१, १६६, १८६ |
| योगाचारमते ज्ञानाकारस्य वहिरध्यासः | श्रीनारायणचन्द्रगोस्वामी एम ए | ३५ |
| वाणीस्तोत्रम् | श्रीदुर्गादासगोस्वामी एम ए साहित्यशास्त्री | १४७ |
| वर्षिकोत्सवः | श्रीरामधनशास्त्री | १८५ |
| वेदान्तविमर्षः | श्रीचारुकृष्णदर्शनाचार्य्यः | ५, ३९, ५४, ७८, ९२, १०७, १२६, १४३ |
| शारदश्रीः | श्रीदुर्गादासगोस्वामी ऐम ए | ८३ |
| श्रीरामलीलामृतस्तोत्रम् | श्रीदुर्गादासगोस्वामी एम ए | १७९ |
| श्रीश्रीसीताजयन्त्युत्सवः | | १३३ |
| संस्कृत-साहित्य-परिषद् वृत्तम् (मतिमञ्जरीस्तम्) | | १, १७ |


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



9. **Introduction to the Rigveda** of Sayanacharya—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4 for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14; As. 10 (for member-

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahopadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramasnath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A. Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16 **Yatratattvam** of Raghunandana Bhăttacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members),

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakravarti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof. Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members),

24. **Sataranja Kutuhalam:**—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam:**—(a new MahaKavya) of MM. Kalipada Tarkacharya, Rs, 5;Rs, 4-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXX. No. 2 — June 1957

४०श-वर्षस्य २य-संख्या — १८७९शकाब्दे जैष्ठे मासे

# संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थश्च

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता

वार्षिकमूल्यम्—रूप्यकषट्कम् ६)
Foreign price—1-4 d

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# विज्ञापनम्

## विशेषतो द्रष्टव्यम्

संस्कृतसाहित्यपरिषदः त्रिषष्ट्यधिकत्रयोदशशततम ( १३६३ ) वङ्गाब्दीयं वार्षिकं मूल्यं ( Annual Subscription ) यैर्ग्राहकमहोदयैरेतावत्कालपर्यन्तं न परिशोधितं, तैः कृपया सत्वरं तत् प्रेषणीयम्। अन्यथा (V. P.) डाकयोगेन प्रेरणे व्ययाधिक्यं भविता। अतः परं यैस्तावदस्याः परिषदः सदस्यपदावस्थानं नेष्यते तैर्वेयं तूर्णं विज्ञापनीयाः। इति—

विनीत—संस्कृत-साहित्य-परिषत्-सम्पादकानाम्

१६८।१, राजा-दीनेन्द्रष्ट्रीट्,

संस्कृतसाहित्यपरिषद्-भवनम्, कलिकाता—४

---

# Sanskrit Sahitya Parishat Series

**(Revised up to April, 1951)**

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhanta-bhushan. Re. 1-4 ; Re. I. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshina-charan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kali pada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshina charan Bhattacharya. Rs. 2-8 ; out of stock.

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

(Cont. to Cover 3rd Page)

---

Printed by Bishnupada Bhattacharya M.A. Kabyatirtha. at Calcutta Oriental Press Private Ltd., 9, Panchanan Ghose Lane, Calcutta 9 and Published by the same from Sanskrit Sahitya Parishad, 168/1 Raja Dinendra Street, Shyambazar Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

# संस्कृतसाहित्यपरिषत्

Vol. XXXX. No. 2 | १८७९-शकीये ज्यैष्ठे ४०श-वर्षस्य २य-संख्या | June 1957.

## मतिमञ्जरी

### प्रकृतिकोपः

ऐषमस्तीव्रतरो निदाघः। प्रायेण व्यत्येति ज्यैष्ठो मासः, तथापि नभसि नोपचीयते मेघः। कदाचिदुपचीयमानोऽपि सोऽयमपनीयते सहसा समीरसङ्घातेन। तेन प्रातः प्रभृत्येव प्रज्वलज्ज्वलनकूटादप्यधिक-मुत्तप्तः सौरातपः सन्तापयति शरीरं प्राणवताम्। समीरोपि नीर-सम्पर्कशून्यः कृशानुस्फुलिङ्गतरङ्गायमानः सुदुःसहः शरीरेण। वर्षान्तरे वर्षणमेतावता समयेन समतर्पयद् वसुधाम्। तेन शस्यानि यथाकालं समजायन्त। पादपाः समजीवन। मृत्तिका सलिलसिक्ता प्रागादुर्वरताम्। नाक्लिश्यत् करो व्यजनवातसञ्चालनेनाविरामेण मानवानाम्। न व्यदीर्य्यन्त कण्ठनाड्यः कठोरतृषापरिक्लिष्टानां चातकानाम्। सरोवराणा-मतिशुष्कतया नाभूत सुमहान परिक्लेशः पल्लीगृहपतीनाम्। ऐषमस्तु कोऽयं दैवदुर्विपाकजनिः प्रकृतिविपर्य्ययो नाम। येनाद्य गगनाभोगे नैव समुद्यन्ति जीमूताः। समुद्यन्तोऽपि वा कदाचिद्विनश्यन्तः समुच्छिन्दन्ति प्रचितामपि हन्त वर्षणाशाम्। भूमावुप्तानि न प्ररोहन्ति वीजानि। क्वचन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्ररोहन्त्यपि प्रयत्नशतेन प्रशुष्यन्ति प्रचण्डमार्त्तण्डकिरणसन्तापेन। विशुष्का जलाशयाः। समन्ततः पिपासाक्षामकण्ठाः कुरङ्गविहङ्गा विचिन्वन्ति साग्रहं सलिलानि। कदाचिच्च सूरकरसङ्घातं सलिलवुद्ध्या समनुसरन्तो वृथा प्रवृत्त्या सलिलमनासादयन्तः प्रत्यावर्त्तन्ते दूराध्वप्रस्थान-परिश्रान्ताः। दुःसहतापेन सन्दह्यते शरीरं, क्षामः कण्ठः, तापविनि-वृत्तये सेव्यमानानि परिमाणवाह्यानि सलिलान्युपजनयन्ति ज्वरादिरोग-निकरम्। तत्र केचित् सौभाग्यतो निपुणवैद्यपरिचर्य्यया जीवन्ति, केचिद्वा दैवदुर्विपाकेन स्वल्पैरेवाहोभिर्यमक्षयमासादयन्ति। निषद्यायामद्यत्वे नैव सुलभप्रायाणि संसारयात्रासाधनानि शाकाद्युपकरणानि। महार्घाणि समपद्यन्त स्वल्पमात्राण्यपि तानि तत्र दृश्यमानानि। कालोचितान्यपि दुःशकानि ग्रहीतुं दीनजनैरमृतफलादीनि। येषामुपयोगेन प्रतिवर्षं सम्पद्यते जनसमाजस्य रसायनोपयोगेनेव शरीरपरिपुष्टिः। अतिशुष्क-तया जलाशयानामतिशयेनाल्पतामुपेता मीनसन्ततिः। ततो महदत्याहित-मुदपादि मीनभुजां समाजस्य। गावो यथाकामं न प्रपद्यन्ते क्षेत्रप्ररूढानि स्निग्धतरुणश्यामलानि शष्पाणि। तृषार्त्ताः स्वच्छन्दतो नासादयन्ति स्वच्छतोयानि। तेन प्रभूतं नोपजायते गवां क्षीरम्। नापि तदुपजातं प्राचुर्य्यमश्नुते हविः। ततः कुतः सन्तोषस्य परिपोषस्य वा सम्भावना क्षीरहविर्भुजां समाजस्य? एवमुपनते सर्वेषामेव जनिमतां प्राचुर्य्येण दशाविपर्य्यये मूलमनुसन्दधानाः केचन विचारयन्ति यत् साम्प्रतं कैश्चन पारमाणविकास्त्रशक्तिपरीक्षार्थं प्रशान्तमहासागरादौ यत् पारमाणविक-स्फोटविस्फोरणं क्रियते तत एवायमपूर्वानुभूतः सन्तापः समन्ततः प्रसृतः समजीजनद् विपर्य्ययं वायुमण्डलस्य। तस्यैव च महता विपर्य्ययेण समजनिष्ट तावान् वर्षणाभावकृतो जगति विपत्पातः। यादृशः पुरा कदापि नान्वभूयत भारतवर्षेण विशेषतो वङ्गप्रान्तेन। विचार्य्य पार-माणविकास्त्रपरीक्षाया बहुदिग्वर्त्तिनीमपकारितामत एव शान्तिकामिनो विशेषविदः प्रतिषेधन्ति प्रतिमुहूर्त्तं तारस्वरेण साग्रहं तत्परीक्षाव्यापारम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


किन्तु हा हन्त! नोपशाम्यन्ति क्षुद्रस्वार्थपरास्तथापि तत्परीक्षार्थं समग्रसरा विश्वव्यापत्तिनिबन्धनादात्मव्यापारात्। किमिदं लक्षणं विश्ववरेण्यायाः सभ्यतायाः। अल्पस्य हेतोर्बहु हातुमिच्छन्तस्ते किमतः परमपि विचारकुशला इत्यस्माभिरभिष्टोतव्याः ?

केचित् पुनरस्य नवीनविधविपर्य्ययस्य निदानं जगतो दुरदृष्टप्रतानमेव मन्यन्ते। तथाहि नास्ति जगति थाविधं किञ्चिद् यन्नादृष्टजन्यम्। तत्र शिवं सुखञ्च वस्तु शुभादृष्टजन्यम् अशिवमसुखञ्च दुरदृष्टजन्यमिति शास्त्रस्थितिः, युक्त्यापि तदेवोपपन्नं भवति। तदुक्तं कुसुमाञ्जलिकारिकायामुदयनाचार्य्यैः,—

सापेक्षत्वादनादित्वाद् वैचित्र्याद् विश्ववृत्तितः।
प्रत्यात्मनियमाद्भुक्तेरस्ति हेतुरलौकिकः॥ इति

तदस्य सुतरामशिवमयस्यासुखस्य च महाविपर्य्ययस्य दुरदृष्टमेव निदानमिति निर्विरोधेन सिद्धं भवति। प्राचीने काले प्रायेण निखिलाः सामाजिकाः शुभकर्मपराः समजायन्त। कार्य्याकार्य्यव्यवस्थितौ ते शास्त्रमेव प्रमाणं मन्यमानाः शास्त्रादिष्टानेव विधीन विदधानाः कल्याणमलभन्त। शास्त्रविगीतान विधीनापातरमनीयफलानुगुणानपि मधुसम्पृक्तं विषमिव नितरां परिहरन्तः करालदुःखभोगाद् दुरे व्यतिष्ठन्त। किन्तु साम्प्रतिकाः सामाजिका नैव तदनुकर्त्तारः परिदृश्यन्ते। लौकायतिकं राद्धान्तमेव दृढ़मनुवर्त्तमानानां तेषां शास्त्रमुपदेशो महाधूर्त्तवकानाम्। मिथ्याभूतमदृष्टम्। अलीकः परलोकः। सुतरां द्वेष्यः परमेशः। परमार्थः स्वार्थः। परप्रवञ्चनानयः शिक्षणीयः। कपर्द्दकमात्रलाभायापि नितरां लघ्वी परहत्या। विरागो नित्यादिकृत्येषु। भूयान् रागः शास्त्रविगीतेषु। हेया गुरुद्विजदेवतापूजा। समुपादेया नीचसेवा। तेन तेन चान्येन दुष्कृत्यकलापेन समुपचितं जीवानां सुमहद्दुरदृष्टमनिष्टानुबन्धि। अद्यत्वे विज्ञेष्वपि लुप्ता यज्ञरतिः। तत एव नोपजायते यज्ञजन्यः पर्जन्यः। तेनैव सुतरां दृष्टिपथमतिक्रान्ता तदुतसृष्टा वृष्टिः। तदभावेनैव समभवत साम्प्रतिको दुरन्तदशासन्निपातः तदनु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कूलश्च परितः पल्लवितः कारणव्रातः । तदलमन्येषामधिक्षेपेण । स्वखात एव श्वभ्रे समुपचिते सलिलराशौ निमग्नाः कमन्यमधिक्षिपन्तु । तदत्र कल्याणं कामयमानैरनारतमात्मशुद्धिरध्येतव्या । 'नान्यः पन्था विद्यते अयनाय' ।

---

## वार्त्तावर्त्तिका

प्राचीनग्रन्थाविष्कारः—महीशूरप्रदेशीयप्राच्यगवेषणापरिषदा एकः प्राचीनायुर्वेदशास्त्रीयग्रन्थः संगृहीतः । ग्रन्थस्य तस्य नाम 'कल्याण-कारक' इति । जैनपण्डितः पूज्यपादो नाम कश्चिदिमं ग्रन्थं रचितवान् । ग्रन्थोऽयं त्रिशततालपत्राधारेषु लिखितः । स एव षट्शतश्लोकात्मकः । श्लोकाः सर्वे तत्र संस्कृतभाषामयाः, व्याख्या च तेषां कर्णाटकभाषामयी । महीशूरप्रदेशस्य मायाकोण्डानामकस्थाने ग्रन्थोऽयं लब्धः । अनुमीयते ग्रन्थोऽयं पञ्चशतवत्सरेभ्यः पूर्वं विरचितः । नाद्याप्यस्य ग्रन्थस्य मुद्राङ्कनं समजनीति स्वाधीनताख्यवङ्गभाषामयपत्रिकापाठेनाभिज्ञायते ।

किञ्च कलिकाताराष्ट्रियसंस्कृतमहाविद्यापयस्य महता भाग्येन नाति-चिरात् पूर्वमेव तत्राध्यक्षपदमलङ्कृतवतां नानाशास्त्रनिष्णातानाम् एम्-ए-डिलिट्पदभाजां विपश्चिदपश्चिम-श्रीगौरीनाथशास्त्रिमहोदयानां विशेषा-वधानेन तन्महाविद्यालयीय-हस्तलिखितपुस्तकस्तोमेषु समुपलब्धाः केचन प्राचीनाः सुदुर्लभा न्यायशास्त्रादिग्रन्थाः, येषां प्रकाशनार्थं राष्ट्राधिकार-कोषादर्थलाभाय दृढं प्रयत्नमनुतिष्ठासन्तः शास्त्रिणः सुतरां प्राच्यग्रन्थ-प्रियाणां प्रियाय परिकल्पन्ते !

तदेवमुत्तरोत्तरं शास्त्रिणाममीषां तथा विद्याभिवृद्धिसाधनक्रियाकला-पेन राष्ट्रियसंस्कृतमहाविद्यापयस्यामुष्य भाविनं महान्तमभ्युदयं सम्भाव-यन्तो वयमीश्वरसमीपे तेषामनामयं दीर्घजीवनं निर्मलयशःसम्पदा समं सुचिरमत्राध्यक्षपदाधिष्ठानं निष्कुण्ठां विद्यासमृद्धिसाधनक्रियाशक्तिञ्च साग्रहं कामयामहे ।

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080524

# वेदान्तविमर्षः

( प्रथमभागः )

[ निबन्धक :—श्रीचारुकृष्णदर्शनाचार्यः ]

( पूर्वानुवृत्तः )

दुरवगाहब्रह्मावधारणं न स्वतः प्रायो विपर्यासदर्शनात् "जुष्टं यदा पश्यत्यन्यमि"त्यादिदर्शनात् केषाञ्चित् द्वैतस्यापि सम्यक्त्वावगमोक्तेरित्यात्मयाथात्म्यावगमार्थं प्रवृत्तिः श्रवणे वाच्या। लोके च संशयविपर्यासोत्सेधार्थं दृश्यते विचारप्रवृत्तिर्न पुण्यार्थमिति श्रवणविधेर्दृष्टार्थत्वसम्भवे बलाददृष्टार्थत्वकल्पनं स्वस्य प्रतिभाप्रकर्षख्यापनार्थतामेव ख्यापयति। तदुक्तं—

"इति दृष्टार्थसम्पत्तौ नादृष्टमिह कल्पते"। इति।

किञ्च नित्यनैमित्तिककर्म्मकलापैरतिनिर्मलस्वान्तस्यैवाधिकारान्न नियमादृष्टापेक्षाऽविद्यानिवृत्तिप्रतिबन्धककल्मषस्यैवाभावात्। न च भाषान्तरेणात्मयाथात्म्यावगतिः बहुलं वैकल्यदर्शनात्, विना देवभाषां भाषान्तरैः सम्यगर्थास्फुरणदर्शनाच्च।

वेदाध्ययनादेव भवतां निर्विशेषब्रह्माधिगमात् दुरवगाहब्रह्मावगमार्थं श्रवण एव प्रवर्त्तते श्रोतव्यविधिदर्शनात् न पुराणादौ कल्पसूत्रादिवत् तेषां वेदाङ्गत्वाभावादिति न नियमविधिः।

"ज्ञानप्रसादेन विशुद्धसत्त्व" इत्यादिभिर्ध्यानपरिशुद्धमनस एव साक्षात्कारकारणत्वस्य कण्ठतः कीर्त्तनात् शब्दस्य चाकीर्त्तनात् प्रत्युत "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेने"ति प्रतिषेधाच्च न मननादिसहकारेणापि प्रत्यक्षहेतुत्वमिति न नियमः श्रवणे।

न च निर्विचिकित्सपरोक्षज्ञानार्थं श्रवणं श्रवणपदस्य विचारपरत्वे अतिगौरवस्योक्तत्वात् नृपकथां शृणोति भ्रमणवार्त्तां शृणोतीति भूयःप्रयोगादतो न तदर्थं नियमः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



बहुशः श्रवणेऽपि देहात्मभ्रमानिवृत्तेर्न तत्र सहकारिकारणं दण्डादेर्घट-कारणत्वस्य क्लृप्तत्वादेव सहकारित्वं नैवं श्रवणस्य, किन्तु मननध्यानवत् प्रयोजकमात्रं ज्ञेयम्, श्रवणादिना यथाक्रमं जाते चोत्कर्षे जायते ध्यानेनैव चित्तवैशद्यं तादृशेन च चित्तेन साक्षात्क्रियते ब्रह्म। स्मृतौ च "तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दती"ति योगस्य साधनत्वमुक्तं, "योगेन कर्मयोगेन समाधियोगेन च संसिद्ध" इति च भवतां व्याख्या।

"योगी युञ्जीत सततमात्मानं रहसि स्थितः" इत्युक्त्वा "शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः" इत्यादिना ध्यानस्यैव प्रकारः सप्रपञ्च उक्तः।

"ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना।
अन्ये सांख्येन योगेन कर्म्मयोगेन चापरे"॥

इति च ध्यानादिरेवोक्तो न श्रवणस्य नामापीति मनःसहकारितयापि न श्रवणे नियमविधिः।

न च तात्पर्य्यभ्रमादिपुरुषदोषनिवृत्त्यर्थो नियमविधिरवघातादि-नियमविधेरदृष्टमात्रजनकत्वस्यैव दर्शनात्, न च श्रवणोपजातपुण्येन प्रति-बन्धकदुरितनिवर्हणात् पुंदोषनिवृत्तिः नित्यनैमित्तिककर्मकलापैरति-निर्मलस्वान्तस्यैवाधिकारित्वात् तस्य निष्पापतायाः प्रागेव सिद्धत्वात्।

न च लौकिकवैदिककर्म्मान्तरनिवृत्तिरूपपरिसंख्याविधिः, व्यास-वशिष्ठादिब्रह्मर्षीणां जनकादिराजर्षीणां च यज्ञराजकार्य्यादिव्यापार-वतामपि ब्रह्मदर्शनदर्शनात्। तदुक्तं जनकेन—

"मिथिलायां प्रदग्धायां न मे दह्यति किञ्चन"।
"यश्च मे दक्षिणं वाहुं चन्दनेन समुक्षयेत!
सव्यं वास्यापि यस्तक्षेत् समावेतावुभौ मम"॥
"सुखी सोऽहमवाप्तार्थः समलोष्टाश्मकाञ्चनः।
मुक्तसङ्गः स्थितो राज्ये विशिष्टोऽन्यैस्त्रिदण्डिभि"रिति।

श्रवणं च ज्ञानमेव, तत्रापि विधिः सम्भवतीति दर्शितं सूत्रभाष्ये।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अध्ययनविधिना व्याकरणकोषादिसञ्जातपदतदर्थादिज्ञानस्यापि दुरवगाह्याम्नायार्थयाथार्थ्यं बहुलं विप्रतिपत्तिदर्शनात् नात्मयाथात्म्यबोधः समुदेति स्वतः, दृश्यते च "सदेव सौम्येदमग्र आसीदि"ति सत्पदस्य, "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद् ब्रह्मे"ति ब्रह्मपदस्य, "अशब्दमस्पर्शमरूपमव्ययमि"त्यशब्दादिपदस्य च प्रधानपरता सांख्यानामिति गुरुमुखादेवाम्नायार्थग्रहणाय श्रवणं विदधाति श्रुतिर्भगवती श्रोतव्य इति। व्याकरणादिसहायतो गुरुमुखात् सामान्यतः श्रुतस्यापि सांख्यादिविरुद्धतर्कान्निष्कम्पप्रवृत्त्यनुदयात् तदर्थं मननविधिर्मन्तव्य इति। श्रुतमतस्यापि ब्रह्मणो दर्शनाभावात् चित्तवैशद्यसम्पत्त्यर्थं निरन्तरब्रह्मानुसन्धानरूपध्यानविधिर्निदिध्यासितव्य इतीति सर्व्वत्रापूर्व्वविधिरेव ज्ञेयः।

ध्यानं नाम श्रुतमतस्य सर्गादिकारणस्य ब्रह्मणश्चिन्तनं, तच्चानवरतं कार्य्यं, "मत्वा च सततं ध्येयः" "ध्यानाभ्यासरसेन चे"त्युक्तेः, "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इति श्रुतेश्च, निदिध्यासनं च नितरां ध्यानम्, न तु सोऽहमस्मीति चिन्तनं वेदान्तेष्वभावात् तस्य योगिसम्मतत्वाच्च, तथाच योगियाज्ञवल्क्यः:—

"सोऽहमस्मीति या बुद्धिः सा च ध्याने प्रशस्यते"।

"अहमेव परं ब्रह्म परमात्माहमव्ययः।

एवं यद् वेदनं तच्च सगुणं ध्यानमुच्यते॥" इति

तेषामवच्छेदप्रतिबिम्बवादाभ्युपगमात्। नचा"थ योऽन्यां देवतामुपास्तेऽन्योसावन्योऽहमस्मीति न स वेद यथा पशुरि"ति श्रुतेरभेदचिन्तनं कार्य्यमिति वाच्यम्, "अंशो नानाव्यपदेशा"दितिसूत्रे भेदाभेदाभ्यामंशत्वस्यैव सिद्धान्तितत्वात्, भेदोपासननिन्दया त्वं महतो महीयानहं तु क्षुद्रतमस्त्वदंश इति भेदाभेदोपासनमेव कार्य्यमित्येव श्रुतेराशयः।

( क्रमशः )

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# स्वातन्त्र्य-सन्धिक्षणम्

[ निबन्धकः—श्रीश्रीजीवन्यायतीर्थः, एम.ए. ]

पूर्वानुवृत्तम् ।

नाट्योल्लिखितपात्राणि

१ । सूत्रधारः । २ । विदूषकः । ३ । प्राच्यसंस्कृतिः ।
४ । नव्यत्रयं धनेशगणेशरणेशनामकम् । ५ । विश्वबन्धुः ।
६ । श्वेताङ्गः । ७ । माहम्मदः । ८ । भारतमाता ।
९ । दुर्भिक्षदुर्णयकलहाः (त्रयः पुरुषाः) । १० । यतिवरः ।
११ । नगरपालः ।

## प्रथमोऽङ्कः

ततः प्रविशति प्राच्यसंस्कृतिस्तदनु च नव्यास्त्रयः ।

प्राच्यसंस्कृतिः । (त्रस्तगमना) अन्वेषयामि मातरम् । क सा साम्प्रतं भवेत् ?

धनेशः । (प्रथमो नव्यः) अन्विष्यतां माता पितामही प्रपितामही वा । अन्विष्यतामन्विष्यताम् ।

गणेशः । (द्वितीयो नव्यः) ईषदवगुण्ठनवती सिन्दूरविन्दुरञ्जितसीमन्ता । केयं मन्थरगमना मान्धातृपुरन्ध्रिवद् भाति ?

रणेशः । (तृतीयो नव्यः) नम्रा चञ्चलनयना लम्बितचेलाञ्चलावृताङ्गापि । परपुरुषदृष्टिचकिता वन्यविड़ालीव का याति ?

प्रा० सं० । प्राच्या अपि यूयं न मां जानीथ ? अहो स्वल्पमेधसः साम्प्रतिकास्तरुणाः ।

धनेशः । किं नाम दुर्मेधसो वयमिति ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



आङ्गलानां वंशपञ्जीं विश्वमानसरञ्जिनीम्।
ग्रीशरोमककीर्त्तिश्च जानतां नः स्मृतिश्च्युता ?

गणेशः। रूष्यहूणनवतुर्कतर्कितं जोहनार्कंकृतविप्लवोद्भटम्।
वोणपार्टिविकटं च शासनं जानतां किमिति नः स्मृतिश्च्युता ?

रणेशः। मिश्रदेशशवशेषविस्तरं पारसीकरसकाव्यसम्पदम्।
आफगाननवधर्मविप्लवं जानतां किमिति नः स्मृतिश्च्युता ?

प्रा० सं०। सर्वं जानीथ विहाय प्राच्यकथाम्।

धनेशः। प्राचीनचीनवृत्तान्तं जापजातिगतिस्थितौ।
न जानीमो यवद्वीपवलिभर्मकथास्तथा॥
किमन्यत् प्रष्टव्यमवशिष्यते ?

प्रा० सं०। प्राच्यदेशकेन्द्रस्य भारतस्य मधुरमितिवृत्तं स्मर्य्यते रामायणं महाभारतं वा ?

गणेशः। हो ! हो ! तर्हि श्रूयताम्—

सीतां लाङ्गलपद्धतिं हलधरो रामः पुरा वर्वर-
क्षेत्रे दक्षिणनीवृति प्रहितवान् आधातुकामः कृषिम्।
तां रुन्धन् दशकन्धरोऽस्थिरमतिर्मृत्योर्विधेयोऽभवद्
धन्यं रूपककल्पनं कविकृतावेतद्धि रामायणम्॥

रणेशः। पुनः श्रूयताम्—

द्यूतादिव्यसनं वधूवसनकेशाकर्षणं संसदि
स्त्रीणां पञ्चपतिप्रसङ्गकरणं कन्यासुतोत्पादनम्।
ज्ञातीनां हननं कुचक्रिचरणद्वन्द्वे च चित्तार्पणं
व्यासोपाधिकभूरिसूरिवचनं ज्ञेयं महाभारतम्॥

प्रा० सं०। अहो गवेषणामाधुरी !

ततः प्रविशति विश्वबन्धुः।

विश्वबन्धुः। साधु साधु तरुणाः। सम्यग् विनीताः स्थ। एवमेव



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्राच्यपुराणानां तात्पर्य्यमाविष्करणीयम् ! अथवा पुरातनशास्त्र वर्ज्जनेन निरङ्कुशं नवरूपं स्वातन्त्र्यमादरणीयम् अतएव

अहं वेदकरो नव्यो लोकोक्तावृषिपुत्रकः ।
प्रत्नवेदानुगच्छागचर्मकर्त्तनकर्मकृत ॥

धतेशः । स्वागतं महापुरुष ! कथ्यतां कीदृशो नव्यवेदः ?

गणेशरणेशौ । कथ्यतां नव्यवेदस्वरूपम् ।

विश्ववन्धुः । तर्हि श्रूयताम्—

अथातो नव्यानां ब्रह्मजिज्ञासा । उदरं (परामृश्य) वै ब्रह्म । तद् विजिज्ञासस्व । इतीह वै सर्वे लोका अधिष्ठिताः । तेन हीदं सर्वमाददानेन जीवति प्राणः । सर्वेषां भूतानां लोको यज्जुहोति तद् गृह्णात्युदरम् । उदरे जीवति उपजीवन्ति सर्वेन्द्रियाणि । उदरे जीर्य्यति विशीर्य्यन्ते प्राणो वागुइन्द्रियाणि शरीरं मनश्च । तस्मादुदरं तर्पयस्व ।

ब्रह्मैवेदमुदरं पुरस्ताद् अधश्चोर्द्ध्वं प्रसृतं ह्युदरं वरिष्ठम् ।
आकीटमादेवशरीरमन्तर्ज्योतिर्मयं ह्युदरं तन्नमामः ।

नव्याः । नमो नमो ब्रह्मरूपायोदराय ।

विश्ववन्धुः । नव्यस्मृतिरपि श्रूयताम् ।

सत्यासत्ये दुष्यतो नोदरार्थे कार्य्याकार्य्ये नोदरार्थे विचार्य्ये ।
नो वाधेते उदरं पापपुण्ये वर्णावर्णौ नोदरार्थे च चिन्त्यौ ॥

( क्रमशः )

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# माणवक-गौरवम्

[ निबन्धकः—श्रीकाश्यपकविः ]

( पूर्वानुवृत्तम् )

## सप्तमाङ्के

### पञ्चमदृश्यपटः

धौम्यः—तत कथमद्यापि न ते दृष्टिशक्तिः ? तन कथय पुरश्चरण-वृत्तान्तम् ।

उपमन्युः—एष कथयामि ; श्रोतुमर्हति भगवान । आश्विनेयमन्त्रपुरश्चरणे मया प्रारब्धे एव साक्षादुपगतावाश्विनेयौ मह्यं पूपखण्डमिमं दत्तवन्तौ । कथितश्चाहं ताभ्यां यदेतेन भुज्यमानेन क्षणान्तरमनपेक्ष्यैव भवेदान्ध्यदोषविनिवृत्तिरिति ।

धौम्यः ततपत्नी च—तत् किमद्यापि नेमं भुक्तवानसि ?

कात्यायनः—किञ्चिदप्यनिवेद्य गुरवे नोपभोक्तव्यमिति हेतोः ।

उमपन्युः—एवमिदं यदाह आर्यकात्यायनः । तथाहि,

शिष्येणोपार्जितं यद् यत तत सर्वं द्रविणं गुरोः ।
अदत्त्वा गुरवे तस्य भोक्ता भवति किल्विषी ॥

तदिमं पूपखण्डं गृहीत्वा मामनुग्रहीतुमर्हति भगवान ।

धौम्यः—अहो ! धर्मपरायणता सहिष्णुता च वत्सस्य ! अहो ! बालस्याप्यबालोचितं धैर्यम् ! यतप्रभावेण किल,—

पूपखण्डमुपेत्यापि भेषजं देवतार्पितम् ।
नान्ध्यं स्मृतं महादुःखं किन्तु धर्मः प्रतीक्षितः ।

पत्नी—अहो ! वत्सस्य मे महत्त्वम् ।

धौम्यः—वत्स ! उपमन्यो ! एष त्वत्प्रदत्तं पूपं गृह्णामि । उपनय ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



उपमन्युः—अनुगृहीतोऽस्मि। ( पूपमुपनयति )

धौम्यः—स्वस्ति (गृह्णाति) वत्स ! उपमन्यो ! अथेदानीं मया समादिष्टो मयैव स्वच्छन्दतो विसृष्टमिमं गृहीत्वा रोगनिवृत्त्यर्थमुपयोक्तुमर्हसि। ( ददाति )

उपमन्युः—यथाज्ञापयति भगवान्। ( गृहीत्वा भक्षयन ) अहो ! भाग्यम् ! निवृत्तमान्ध्यम् ! समुन्मीलिता मे दृष्टिशक्तिः ; साम्प्रतं स्फुटं भगवन्तं पश्यामि, अम्बां पश्यामि, आर्यकात्यायनं पश्यामि। पुरेव सर्वमाश्रमं पश्यामि। भगवन् ! भगवन् !

भवतोऽद्य प्रसादेन दस्राभ्यां पूपमीयिवान्।
महादुःखमयादान्ध्यान्मुक्तोऽस्मि सुचिरादहम् ॥

धौम्यः—वत्स ! स्वेनैव महिम्ना तथा वर्द्धसे। वयन्तु केवलमुपदेशेन सहायभूताः। तथाहि पश्य,—

वनं दहति दावाग्निः स्वेनैवोग्रेण तेजसा।
साहाय्यं कुरुते तत्र केवलं पवनो बली ॥

उपमन्युः—भगवन् ! किमपराद्धं मया यदेवमुच्यते ? अहं जानामि,—

गुरोरेव प्रसादेन कल्याणं सकलं मम।
अकल्याणं यदायातं तत् स्वदोषान्न चान्यतः ॥

धौम्यः—वत्स ! निरन्तरमुदित्वरेणैवं प्रत्ययेन सुचिरं वर्द्धस्व।

उपमन्युः—अहो ! अनुगृहीतोऽस्मि।

कात्यायनः—वयस्य ! भगवत्प्रसादेन प्रत्यागतदृष्टिशक्तिः सुदृढं मां परिष्वजस्व।

उपमन्युः—( परिष्वज्य ) आर्य कात्यायन ! परमः सहायो भवान् मे सर्वकल्याणेषु। नास्ति तथोपकरणं किञ्चिद् येन भवतो महद् ऋणमपाकुर्याम्।

कात्ययनः—वयस्य ! सौजन्यरत्नमेव पर्याप्तमुपकरणं ते ऋणसम्भार-परिशोधनाय। अथवा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


प्रिय ! किं वात्र बहु वक्तव्यम् ?

स्मरामि यावत् किल तामवस्थां
तावन्मनो याति विलोलभूयम् ।
तस्यां दशायां पुनराशु गन्तुं
विन्दामि वाञ्छां खलु तावदेव ॥

अनुजस्य सुवृत्तस्य हितार्थं यद् विधीयते ।
ऋणवान् नानुजस्तेन संसारस्थितिरीदृशी ॥

तदलमत्र ते लाघवलेशानुध्यानेन ।

धौम्यः—वत्स ! उपमन्यो ! समुत्तीर्णोऽसि दुस्तरां परीक्षामहास्रोतस्विनीं, सुगृहीतस्ते महिमा, तदद्य प्रभृति,—

यथा सर्वाणि वस्तूनि भासन्ते तव नेत्रयोः ।
तथा सर्वाणि शास्त्राणि भास्यन्ति हृदयस्य ते ॥

पत्नी—वत्स ! आशीरेषा वरस्ते भूयात् ।

उपमन्युः—अहो ! कृतार्थोऽस्मि । भगवन् !

अद्य मे सफलं जन्म सर्वं पुण्यं फलोन्मुखम् ।
येन त्वत्करुणालेशस्पर्शादाप्तः कृतार्थताम् ॥

कात्यायनः—अहो प्रसादः !

प्राणाधिकवयस्यस्य महिम्ना भूरि दीव्यता ।
हृष्टोऽस्मि कृतकृत्योऽस्मि कृपया भगवद्गुरोः ॥

तदेहि वयस्य !

परिष्वजस्व भूयो मां पूतो गुरुकृपाम्बुभिः ।
कृतकृत्यस्य ते स्पर्शात् पूतमस्तु वपुर्मम ॥

उपमन्युः—अहो ! अनुगृहीतोऽस्मि । (परस्परमालिङ्गतः)

धौम्यः—प्रिये ! पश्य पश्य सोदराधिकस्नेहोपचारं स्वाध्यायसुहृदोः ।

पत्नी—एवं पश्यामि, पश्यन्ती च परं प्रसीदामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



धौम्यः—प्रिये ! अनेन वत्सयोः प्रणयोपचारेण स्मराम्यहमात्मनः प्रियतमानां स्वाध्यायसुहृदाम् ।

यत्सङ्गान्नन्दनानन्दमविन्दत मनश्चिरम् ।
यः स्वाप्निक इवाभाति नियतं कामगोचरः ॥

स इदानीं प्रयत्नशतैरपि न शक्यः साक्षादुपलब्धुम् ।

पत्नी—जानामि आर्य्यपुत्र ! जानामि, तदीयं वृत्तमसकृदेवोपवर्णितपूर्वं भवता ।

धौम्यः—आं स्मर्य्यते ।

पत्नी—वत्स ! कात्यायन ! वत्स ! उपमन्यो ! प्रसन्नावावां युवयोरनेन व्याजवर्जितेन मैत्रीबन्धेन । तदाशास्वहे यत सुचिरं प्रसरन्ती परमानन्दाय कल्पतामियं युवयोर्मैत्रीति ।

उपमन्यु-कात्यायनौ—सुमरामनुगृहीतावावाम् ।

कात्यायनः—अम्ब !

आशीरेषा वरो भूत्वा मैत्रीं नौ जीवयेद् ध्रुवम् ।
प्रत्यक्षदेवतायास्ते वाणी कथमसत्फला ?

पत्नी—एवमेवास्तु देवताप्रतादात् ।

उभौ—अम्ब ! अस्माकं किल देवतेति लघ्वी मात्रा । अस्माकम्—

विना युवाभ्यां न परास्ति देवता
विना वचो वां श्रुतिरस्ति नापरा ।
युष्मत्प्रसादेन विना विवृद्धये
नचापरं संश्रयणीयमीक्ष्यते ॥

पत्नी—वत्सौ ! न खल्वविदितस्तावदयमर्थ आवयोः ।

धौम्यः—सत्यमेवोक्तं गृहिण्या । वत्स ! उपमन्यो !

लब्धा सौभाग्यतो दृष्टिः परीक्षायां जयो वृतः ।
प्रतिभातानि शास्त्राणि किन्ते काम्यमतः परम् ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


उपमन्युः—भगवन् ! कोऽत्र सन्देहः,

जन्मान्तरीणपुण्यानां प्रभावाद् भवताधुना ।
वितीर्णं समवाप्तोऽस्मि काम्यानामुत्तरावधिम् ॥

तथापि,—(इत्यर्द्धोक्ते तूष्णीं स्थितः) ।

कात्यायनः—किन्तु नाम काम्यमपरं भवेदुपमन्योः ?

धौम्यः—वत्स ! कथय शेषम्, कथमर्द्धमुक्त्वा तूष्णीं वर्त्तसे ? वत्स !

अदेयमस्ति किं वस्तु तुभ्यं प्राणाधिकाय मे ।
स्मारयित्वापरं देयं प्रीतिमाधेहि मे पराम् ॥

उपमन्युः—भगवन ! तव चरणसरोजे यस्य निष्कम्पभक्तिः
यमनियमनिलीनो नायकः सद्व्रतानाम् ।
प्रतिपदमपदोषः सत्क्रियाशुद्धबुद्धिः
स हृदि चरतिधी मानाय्यंकात्यायनो मे ॥
तदीयसिद्धिं न हि यावदीक्षे
तावन्न मे पूर्णतमः प्रसादः ॥

कात्या—( स्वगतम् ) अहो धिक् ! व्रीड़ितोऽस्मि, यदकाले बलात्कारेण वयस्यो भगवन्तं प्रेरयति ।

उपमन्युः— शीलादिभिः सर्वगुणैर्गरिष्ठे
सिद्धिं विना सिद्धिरसौ त्रपा मे ।

धौम्यः—वत्स ! उपमन्यो ! काले त्वया समुद्बोधितोऽस्मि । नोपलक्षितमिदं पुरैव मया विक्षेपेण ।

तदिदानीम्—

कात्यायनस्य निवमप्रचयानुगत्या
चारित्रशुद्धिविभवेन च शुद्धदत्त्या ।
प्रीतो दिशामि हृदयेऽस्य विभान्तु विद्याः
सर्वा हिताय जगतां शिवमस्य भूयात् ॥

वत्स ! कात्यायन ! अलं व्रीड़या, सुचिरात् प्रभृति स्वीयगुणैरेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वशीकृतवानसि नश्चित्तम्। अचिरेणावश्यम्भाविनि ते सिद्धिलाभे काकतालीयन्यायेन उपमन्युना कृतः समुद्बोधः। तदलमन्यथा मत्वा। प्रसन्नमन्तःकरणं कुरु।

कात्यायनः—भगवतः करुणासम्पाते को वा अप्रसादः ? तत सर्वथा अनुगृहीतोऽयं दासजनः। भगवन् !

प्राक्तनं सुकृतं सर्वमद्य मे सुफलावहम्।
अद्य मे सफलं जन्म भगवत्करुणाजुषः॥

तदधुना गृह्यतां भगवन्नस्य दासजनस्य सिद्धिप्रहर्षमयः सभक्तिकप्रणामपर्य्यायः।

धौम्यः—वत्स ! चिराय स्वस्तिमान् भूयाः।

कात्यायनः—अम्ब ! त्वमपि गृहाण यथाकालं पुत्रस्य ते प्रणतिपर्य्यायम्

पत्नी—एहि वत्स ! चिरं कल्याणेन वर्द्धस्व।

कात्यायनः—भृशमनुगृहीतोऽस्मि स्नेहेन मातापितृभ्याम्।

उपमन्युः—इदानीं निखिलकाम्यलाभेन भृशं प्रसन्नोऽस्मि।

धौम्यः—वत्स ! कात्यायन !

ज्ञानेन त्वं गरिष्ठोऽसि तथा वेदपरायणः।
तस्माद् वेद इति ख्यातः पुरतस्त्वं भविष्यसि॥

अपि च—

त्रयो वेदास्त्रयो देवा गुणाः सत्त्वादयस्त्रयः।
धौम्यस्यापि त्रयः शिष्या वेदारुण्युपमन्यवः॥

उपमन्यु-कात्यायनौ—अहो ! गुरुप्रसादः !

(क्रमशः)

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



9. **Introduction to the Rigveda** of Sayanacharya—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4 for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14; As. 10 (for member-

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahopadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramasnath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A. Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkabarya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16 **Yatratattvam** of Raghunandana Bhattacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakra, varti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof.Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members),

24. **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kalipada, Tarkacharya, Rs, 5;Rs. 4-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXX. July 1957

No. 3 १८७९शकाब्दे

४०श-वर्षस्य आषाढे

३य-संख्या मासे

भारतं भातु भारती

# संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थश्च

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता

वार्षिकमूल्यम्—रूप्यकषट्कम् ६)
Foreign price—1-4 d

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# विज्ञापनम्

## विशेषतो द्रष्टव्यम्

संस्कृतसाहित्यपरिषदः त्रिषष्ट्यधिकत्रयोदशशततम ( १३६३ ) वङ्गाब्दीयं वार्षिकं मूल्यं ( Annual Subscription ) यैर्ग्राहकमहोदयैरेतावत्कालपर्यन्तं न परिशोधितं, तैः कृपया सत्वरं तत् प्रेषणीयम्। अन्यथा (V. P.) डाकयोगेन प्रेरणे व्ययाधिक्यं भविता। अतः परं यैस्तावदस्याः परिषदः सदस्यपदावस्थानं नेष्यते तैरियं तूर्णं विज्ञापनीयाः। इति—

विनीत—संस्कृत-साहित्य-परिषत्-सम्पादकानाम्

१६८।१, राजा-दीनेन्द्रष्ट्रीट्,

संस्कृतसाहित्यपरिषद्-भवनम्, कलिकाता—४

---

## Sanskrit Sahitya Parishat Series

**(Revised up to April, 1951)**

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhanta-bhushan. Re. 1-4 ; Re. I. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshina-charan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kali pada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshina charan Bhattacharya. Rs. 2-8 ; out of stock.

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

(Cont. to Cover 3rd Page)

---

Printed by Bishnupada Bhattacharya M.A. Kabyatirtha. at Calcutta Oriental Press Private Ltd., 9, Panchanan Ghose Lane, Calcutta 9 and Published by the same from Sanskrit Sahitya Parishad, 168/1 Raja Dinendra Street, Shyambazar Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं संस्कृत-साहित्य-परिषत् प्रतिमा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

# संस्कृतसाहित्यपरिषत्

Vol. XXXX. No. 3 | १८७९-शकीये आषाढे ४०श-वर्षस्य ३य-संख्या | July 1957.

## मतिमञ्जरी

### विज्ञान-विलासः ।

[ निबन्धकः—श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः ]

बुद्धिजीविनां कर्मकौशलादुत्तरोत्तरसन्मार्गसन्दर्शनं नितरां प्रीतिदायकं समुन्नतिसूचकञ्च । सा च समुन्नतिः परायां विद्यायामाध्यात्मिक्यैव चरमा परमा च । अपरायाञ्च विद्यायां विज्ञानसमालोचनेन तत्तच्चरमोत्कर्षसाधनेन चार्थिक्यादिरेव । "न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृ"दितिनयेन जड़विज्ञानानुशीलनपरायणाः पदार्थविद्यामधिकृत्य परमाणुविषयिणीं गवेषणां कुर्वन्ति स्म । अस्मद्देशेऽपि प्राक् तत्तत्परमाण्वादिपदार्थानुसन्धानेन पदार्थतत्त्वज्ञानद्वारा निःश्रेयसाधिगमप्रकारः प्रदर्शितः कणभुक्पक्षानुसारिभिः । ते च परमाणुमधिकृत्य तत्रत्यशक्तीनां दिङ्मात्रप्रदर्शनेन निरस्ताः । तदनुगुणं च संहितादिषु जीवज्जीवननाशकानां महास्त्रादीनां निर्माणादीनि प्रतिषिद्धानि । आधुनिकपाश्चात्त्यजड़वैज्ञानिकास्तान्येव परमाणुशक्तिसमुद्भूतानि महास्त्राणि निर्माय बुद्धिप्रकर्षं प्रकट-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यन्ति प्रदर्शयन्ति च शस्त्रनिर्माणकौशलप्रतियोगितायां स्वं स्वं प्रकर्ष-वैशिष्ट्यम्। येषां परीक्षणेनारवाख्यमहासागरीयमत्स्या अपि मृताः समुद्रसलिलं यद्येवं दूषितं स्यात् तदा का कथा नभोमण्डलस्य। वैज्ञानिकानामेतदप्यभिमतं यदेतत्परीक्षानिरीक्षणेन मनुष्याणामायुः पञ्चषवर्षदेश्यं ह्रसमानं भविता,—भवितारश्च विकलाङ्गा अधस्तनपञ्चष-पुरुषा अन्ततः प्रक्षीणचिन्ताशक्तयः। इदानीमेव विद्यार्थिगोष्ठीषु मनन-शक्तेर्नितरामभावो दरीदृश्यते भविष्यति च काले किं वा भविष्यति तत् स एव जानाति यस्येच्छया जगदिदं परिचालितं भवति।

वर्षेऽस्मिन्नाषाढेऽपि वर्षाभावः। औष्ण्याधिक्येन विविधव्याधिभिः समाक्रान्तो देशः। इनफ्लुयेञ्जाख्यव्याधिविशेषेण (यस्य नाम समादरेण "फ्लु" इति रक्षितम्) जनानां समधिकानां प्राणहानिः। किमुत सहिष्णवो महान्तस्तरवोऽपि ग्रीष्माधिक्येन म्रियन्ते। चातकवत् सर्वं प्राणिनो निमग्ना जलचिन्तायाम्। सर्वथा प्राकृतिको विपर्यासः संघटितः। तदेतत् सर्वं विज्ञानविलसितं विधिविलसितं वा विचारयन्तु प्रेक्षावन्तो धीमन्तः।

जगन्मङ्गलं साधयति बुद्धिः। 'किं किं न साधयति कल्पलतेव विद्या'। तदिदानीमस्माकं भागधेयदोषाद् वा विधिविलासाद्वा सा बुद्धिः सा च विद्या जगद्विध्वंसं रचयितुं प्रवृत्ता। अयि विज्ञानविलासिनः! अयि धनोन्मत्ताः! विरम्यतां जगद्विध्वंसनव्यापारात्। श्रूयन्तां प्रकृति-स्थानां मङ्गलोपदेशाः। अस्माकं श्रद्धेया भारतप्रतिनिधयः श्रीमन्तो नेहरुमहोदया यदुद्घोषयन्ति तदेवाकर्ण्यतां—निषिद्धीक्रियन्तां लोक-विध्वंसनाय समुदितानामाणविकाद्यस्त्राणां निर्माणं परीक्षा व्यवहारश्च। व्याकुलितां धरित्रीं प्रति तत्रभवतामपि किञ्चित् शुभोदर्कं कर्त्तव्यं विद्यत एव। अथवा कालकालस्य निर्देशादेव भवन्तो निमित्तमात्रम्! अप्यस्माकं दुरदृष्टपरिपाककालः समायातः? अपि संहरणप्रवृत्तो रुद्रः? किमन्यत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कर्तव्यमस्माकं—शरणाभिध्यानं विना—अतस्तदेव न्यायप्रसूनाञ्जलिविधिना क्रियते—

'कारं कारमलौकिकाद्भुतमयं मायावशात् संहरन्
हारं हारमपीन्द्रजालमिव यः कुर्वन् जगत् क्रीड़ति।
तं देवं निरवग्रहस्फुरदभिध्यानानुभावं भवं
विश्वासैकभुवं शिवं प्रति नमन् भूयासमन्तेष्वपि' ॥ इति ॥

---

# जगन्नाथाष्टकम्

निबन्धकः—अध्यापक-श्रीदुर्गादासगोस्वामी, एम. ए. साहित्यशास्त्री

उद्वेल्लत्फेनपुञ्जस्तवकितविपुलोत्तालनीलाम्बुराशेः
कल्लोलैरुल्लसद्भिः कलितकलकलैः प्रोच्छलत्पादमूले।
श्रीक्षेत्रे क्षेमधाम्नि क्षपितकलिमले नित्यनीलाद्रिवासी
सोऽव्यादुर्वीं सुभद्राहलधरमिलितः श्रीजगन्नाथदेवः ॥१
भ्राम्यत्साम्ये विनश्यद्विधिनियमचये सिद्धपीठेऽस्तवर्णे
वन्द्यो श्रीमन्दिराङ्के प्रणतिपरनृणामिन्दिरानन्दकन्दः।
दारुब्रह्मस्वरूपः सुरमुनिमनुजैः प्राज्यमाप्यायमानः
सोऽव्यादुर्वीं सुभद्राहलधरमिलितः श्रीजगन्नाथदेवः ॥२
गम्भीरोदात्तनादैः क्षुभितजलनिधेर्भूरि संवर्ध्यमानो
मन्दैराधूयमानो मलयजमधुरैर्दाक्षिणात्योर्मिवातैः।
इष्टैस्तोष्टूयमानः क्षितिसुरनिकरैश्चान्वहं वेदमन्त्रैः
सोऽव्यादुर्वीं सुभद्राहलधरमिलितः श्रीजगन्नाथदेवः ॥३
पुण्याषाढ़े रथस्थः पथि सपदि मिलल्लोकलक्षाग्रहस्तै-
रज्जुष्वाकृष्यमाणः सकलरव-चलच्चक्रसंघर्षघोषम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मर्त्यामर्त्यागतानां स्तुतिनतिरतिभिर्भज्यमानश्च रागात्
सोऽव्यादुर्वीं सुभद्राहलधरमिलितः श्रीजगन्नाथदेवः ॥४
नानादिग्देशसंसज्जनपदनिपतत्कोटिपुण्यार्थियात्रि-
व्रातानां भक्तिभाजां जय जय भगवन्नुद्धरेत्यार्तरावैः ।
उच्चैराहूयमानः परमकरुणया भुक्तिमुक्तिप्रदाता
सोऽव्यादुर्वीं सुभद्राहलधरमिलितः श्रीजगन्नाथदेवः ॥५
स्वच्छन्दं नर्तकीभिश्चलचरणरणन्मञ्जुमञ्जीरशिञ्जा-
प्रस्पन्दैर्नन्द्यमानः परमपि च मुहुर्निक्कणत्कङ्कणाभिः ।
मुग्धाभिः स्रग्धराभिर्युवतिभिरसकृच्चामरैर्वीज्यमानः
सोऽव्यादुर्वीं सुभद्राहलधरमिलितः श्रीजगन्नाथदेवः ॥६
शेषाहेर्देहशायी प्रमुदितरमया सेव्यमानाङ्घ्रिपद्मो
भक्त्यार्द्रैर्नारदाद्यैर्मुकुलितनयनैर्वीणयोद्गीयमानः ।
धात्रा नाभ्यम्बुजे च श्रुतिसुभगपदैः सन्ततं कीर्त्यमानः
सोऽव्यादुर्वीं सुभद्राहलधरमिलि[illegible]ः श्रीजगन्नाथदेवः ॥७
मौलौ भास्वत्किरीटं मृगमदतिलकं वल्गुभाले तथाक्ष्णो-
श्चन्द्रार्कौ कुण्डले च श्रवणयुगतले सुस्मितं श्रीमुखाब्जे ।
कण्ठे सर्वर्तमालामुरसि भृगुपदं कौस्तुभञ्चापि बिभ्रत्
सोऽव्यादुर्वीं सुभद्राहलधरमिलितः श्रीजगन्नाथदेवः ॥८
श्रीदुर्गादासविप्रस्य स्तोत्रं श्रोत्रसुखं सदा ।
जगन्नाथाष्टकं नाम प्रीतयेऽस्तु महाप्रभोः ॥९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# स्वातन्त्र्य-सन्धिक्षणम्

[ निबन्धकः—श्रीश्रीजीवन्यायतीर्थः, एम.ए. ]

पूर्वानुवृत्तम् ।

प्रा० स० । अलमधिकालङ्कारभङ्कारेण ।
उदरैकमतिर्भवत्युदारो नयहीनो विनयप्रदो विनेता ।
इह सङ्करमाह शङ्करं यः, स किलाप्तो धरणीतले वरेण्यः ॥

वि० व० । बाढ़म ! ( उच्चैःस्वरम् ) निरङ्कुशं स्वातन्त्र्यम्, निरङ्कुशं स्वातन्त्र्यमुपास्यम् ।

गणेशः । धन्यो भवान मूर्द्धन्यो भवान् । उपेक्ष्यतामियं प्रलापपरा नारी । इदानीं भवतो निरङ्कुशस्वातन्त्र्यतत्त्वं श्रोतुमिच्छामि ।

वि० व० । तद्धि पूर्वागतसर्वबन्धनमोचनं स्वेच्छाचाररोचनं नाम ।

गणेशः । अहो ! सर्वतो विलक्षणमिदं स्वातन्त्र्यलक्षणम ।
मज्जामि सिन्धौ विहरामि शैले व्योम्नस्तले सोमसुधां पिबामि ।
धावामि भूयो विचरामि भूमौ नृत्यामि गायामि यथाभिलाषम् ॥

प्रा० स० । इदमुन्मादलक्षणम् ।

वि० व० । एतावत्कालपर्यन्तं शास्त्रावरणसङ्कटम ।
प्राप्तं स्वातन्त्र्यशस्त्रेण घातयाम्यद्य खण्डशः ॥

प्रा० स० । एतावत्कालपर्यन्तं देहेन्द्रियव्यवस्थितिम ।
प्राप्तां स्वातन्त्र्यशस्त्रेण विपर्यस्तां विधेहि भोः ।
निम्ने धारय मुण्डं चरणद्वयमुपरि चालयाकाशे ।
कर्णौ छिन्धि च नासे योजय मूर्द्धनि शिखापार्श्वे ॥

वि० व० । अतीव मूर्खता प्रखरमुखरता च । अयि ललने ! यदि मदुपदेशमनुसरेस्तदा त्वमपि स्वाधीनतासुधास्वादं ज्ञातुं प्रभवेः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



(सनृत्यं) पातय पादौ निर्भयमादौ स्फीतं दर्शय वक्षः
त्यज गृहकोणं भज नहि मौनं लज्जां नियतं तक्ष ।
सज्जितवेशा चिक्कणकेशा चारुकलामभिलक्ष्य
निक्कणपीनां वादय वीणां गीतं वदने रक्ष ॥

प्रा० स० । मम वदने वर्त्तत एव किञ्चिद् गीतम् । तदाकर्ण्यताम्
श्रुतिविधिसरणौ स्थापय चरणौ न तरुण तरलतरङ्गे
पूर्वकृतक्रमभृगुपद आरम नहि मदमत्तमतङ्गे ।
मुनिगिरि गौरवमनुभव नीरव इह ननु चपलकुरङ्गे
विहर श्रृतम्भरवचसि सुनिर्भर उदितसुधारसरङ्गे ॥

[ततः प्रविशति नामावलीलाञ्छितमुत्तरीयं स्कन्धे करे च कुशकमण्डलू धृत्वा श्वेताङ्गः ।]

श्वेताङ्गः । कथिता वयं महात्मगान्धिनापि मुञ्चत भारतमिति दारुणं वचनम् । तद् वयं निजदेशं प्रतिगच्छामः । अरे भारतीया न खलु ज्ञातं श्वेताङ्गचरितं युष्माभिरचिरेण ज्ञास्यते तत् ।

एषोऽहं प्रतिनिधिरत्नमाङ्गलानां
यत्नादाहृतकुशभृतकरण्डपात्रः ।
स्वातन्त्र्यं भरतभुवोऽधिवासिहस्ते
दातव्यं तदिह शुभेच्छया भ्रमामि ॥

धनेशः । मित्रवर ! कोऽयं स्वातन्त्र्यदानाय सकण्ठघोषं प्रतिग्रहीतारमन्विच्छति ?

गणेशः । अस्माकमभीष्टं फलं स्वत उपनतमिति मन्ये ?

प्रा० स० । पाश्चात्यानां कापि चातुरीति मन्ये ।

वि० व० । उदाराणामाङ्गलानां प्रतिश्रुतिपालनमिदम् इति प्रतिभाति मे । यावद् निरूपयामि तत्त्वम् । ( निष्क्रान्तः )

रणेशः ! श्रूयतामनेन किमुच्यत इति ।

श्वेताङ्गः । श्रुतं केनचित् कदाचिदपि ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कन्याहिरण्यवसनान्नधनानि दातुं
लोके विभान्ति बहवः पुरुषप्रकाण्डाः ।
स्वातन्त्र्यनामकमहो महनीयवस्तु
को वा प्रदातुमभिवाञ्छति दुर्गतेभ्यः ॥

अहो ! मादृशामौदार्यम् !

साद्धैंकशतवर्षाणि हर्षाद् भुक्त्वापि भारतम् ।
करामलकवद् वश्यमस्माभिर्मुच्यते क्षणात् ॥

अये ! काश्चिल्ललना केचन तरुणाश्च दृश्यन्ते । यावदेतान् उपच्छन्दयामि । भो भो भारतीयाः ! प्रतिगृह्यतामस्माभिर्दीयमानं स्वाधीनताधनम् ।

[ श्वेताङ्गः कमण्डलुजलेनाचम्य कञ्चुककक्षादेकं पत्रं वाचयति ]

विष्णुर्नमोऽद्य श्वेतवराहकल्पे वैवस्वते मन्वन्तरेऽष्टाविंशयुगान्तर्गतकलियुगे जम्बुद्वीपे भारते वर्षे यमुनातटस्थे परमपावनेन्द्रप्रस्थपुरे सप्तचत्वारिंशदधिकोनविंशक्रीस्ताब्देऽगस्त्यमासस्य पञ्चदशदिवसे शुक्ले पक्षे शुक्रवासरे पुष्यानक्षत्रे असृग्योगे विष्टिकरणे चतुर्दश्यां तिथावारभ्यागामिवर्षीयजुनमासस्याष्टाविंशदिवसं यावद् रोमकादिसप्तगोत्रः ससम्राडाङ्गलप्रतिनिधिः श्रीमान् ब्रिटेनसिंहवर्मा श्रीमदीशक्रीस्तप्रीतिकामः सप्तसागरदुर्लभनिधिसारं पुरुषार्थचतुष्टयाधिकं पूर्णस्वातन्त्र्यरत्नं यथासम्भवगोत्रनामभ्यो भारतवासिभ्यः—

( क्रमशः )

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# माणवक-गौरवम्

[ निबन्धकः—श्रीकाश्यपकविः ]

( पूर्वानुवृत्तम् )

## सप्तमाङ्कः

पञ्चमदृश्यपटः

( ततः प्रविशति सम्भ्रान्त आरुणिः )

आरुणिः—( स्वगतम् ) अये ! एष आर्य्यकात्यायनः ! एष आन्ध्यमुक्तो वयस्य उपमन्युः ! एष भगवान् गुरुः ! एषा च भगवत्यम्बा ! सर्व एवैते प्रसन्नाः समनुभूयन्ते । तत् प्राप्तकालमुपसर्पामि । ( उपसृत्य ) भगवन् ! भगवत्यम्ब ! आर्य्य कात्यायन ! एष आरुणिर्वः प्रणमति ।

धौम्यः—सर्वतः स्वस्ति भूयात् ।

धौम्यपत्नी—एहि वत्स ! चिरं जीव ।

आरुणिः—अनुगृहीतोऽस्मि ।

कात्यायनः—वयस्य ! दृढं परिष्वजस्व ।

आरुणिः—अनुगृहीतोऽस्मि । ( मिथः परिष्वजेते ) वयस्य ! उपमन्यो !

राहुग्रासविनिर्मुक्तः सुधांशुरिव निर्मलः ।
गुरुप्रसादलाभेन प्रमोदं तनुषे भृशम् ॥

तदेहि, गाढं परिष्वजस्व माम् । ( मिथः परिष्वजेते )

उपमन्युः—अहो ! आनन्दसंप्लवः ! अनुगृहीतोऽस्मि ।

धौम्यः—वत्स ! आरुणे ! काले प्राप्तोऽसि । अद्य त्वयीव समादिष्टो मया प्रीतेन उपमन्यौ कात्यायने च सर्वविद्यावभासः । तत् सम्मिलिता एव त्रयो यूयं विद्यावभासप्रसूतमानन्दं विन्दत ।

आरुणिः—भगवन् ! प्राप्तकालं कथयामि, यत् सत्यं,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अद्य विद्याप्रकाशोत्थं सुखं मे पूर्णतां गतम्।
सर्वविद्याप्रकाशेन कृतेन भवतानयोः ॥

धौम्यः—वत्स ! चिरं जानाम्येव युष्माकं मिथस्तथा प्रीतिम् ।

आरुणिः—किं वा लेशमात्रेणाप्यविदितं भगवतः प्रतिभायाः ।

कात्यायनः—युज्यते ।

आरुणिः—भगवन् ! अथेदानीमवसरप्राप्तं किञ्चिद् वक्तुमिच्छामि ? यद्यभयमादिश्यते ।

धौम्यः—वत्स ! अभयं ब्रूहि ।

आरुणिः—भगवन् ! चिरन्तनरोगशीर्णं सुदुःखिते हारीते भगवता क्रियमाणं प्रसादमिच्छामि ।

धौम्यः—कथमिव ? स हि मया रोगमुक्तये तदा सूर्यमन्त्रपुरश्चरणमुपदिष्टः

आरुणिः—जानामि । तस्य यथानियमं सुचिरमादरेण तदेवानुतिष्ठतस्तावदद्य सहसा गगनवाणी समुदचरत ।

धौम्यः—कीदृशी ननु सा ?

आरुणिः—शृणोतु भगवान्,—

हारीत ! यावद् गुरुणा प्रसीदता
न दृश्यसे त्वं कृपया विमूढ़धीः ।
तावन्न सिद्धिस्तव कृत्यसम्भवा
न रोगमुक्तिश्च शुभायतिर्भवेत । इति

धौम्यः—एवमिदं ननु ? वत्स ! आरुणे ! अपि नातिचिरं दृष्टस्त्वया हारीतः ?

आरुणिः—भगवन् ! अथकिम् । इदानीमेव दृष्टः ।

धौम्यः—वत्स ! गगनवाणीश्रवणादनन्तरमिदानीं किमसावनुतिष्ठति ?

आरुणिः—गुरुणा कोपेन परिहृतस्य ममाधन्यस्य का गतिरित्युच्चैरुच्चार्य गलदश्रुधारं निरन्तरं रोदिति ।

२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



धौम्यः—वत्स ! आरुणे ! अपि नाम हारीतः सत्यमेव साम्प्रतमनुतप्तः ?

आरुणिः—भगवन् ! अथकिम् ।

अश्रुणा तस्य दीनस्य हृदयप्लाविना भृशम् ।
सानुतापविलापैश्च पाषाणोऽपि विदीर्य्यते ॥

अपिच
विहङ्गकुलनिह्रादैः सायं शिशिरविन्दुभिः ।
तद्दुःखदुःखिता नूनं रुदन्ति वनदेवताः ॥

धौम्यः—वत्स ! आरुणे ! यद्येवं समाहूयतामत्र हारीतः ।

आरुणिः—यथाज्ञापयति भगवान् । ( निष्क्रान्तः )

कात्यायनः—अहो ! भगवतः करुणा !

धौम्यपत्नी—आर्य्यपुत्र ! सत्वरं क्रियतां हारीतस्य दुःखप्रतीकारः ।

( ततः प्रविशति हारीतेनानुगम्यमान आरुणिः )

आरुणिः—वयस्य ! हारीत ! एतौ भगवन्तौ मातापितरौ, तदुपसर्प ।

हारीतः—अहह ! कुष्ठरोगग्रस्तः पातकी कथमहमेतावुपसर्पेयम् ? तद् दूरत एव प्रणमामि । ( प्रकाशम् ) अयि ! भगवन्तौ मातापितरौ ! एष कुष्ठरोगग्रस्तः पातकी हारीतो युवां प्रणमति ।

धौम्यः—वत्स ! हारीत ! निर्व्याजं प्रीतोऽस्मि ते । निःशङ्कमुपसर्प । अचिरं ते रोगमुक्तिर्भविता ।

धौम्यपत्नी—अहो ! ईदृशः संवृत्तो मे हारीतः ?

नेपथ्ये आकाशवाणी—'वत्स ! हारीत ! एष सूर्य्योऽस्मि ।

प्रीतो गुरुस्तुष्टिमगां ततोऽहं
मन्त्रस्य ते साधनमाप सिद्धिम् ।
आरोग्यमासादय मत्प्रसादात्
रूपं पुराणं पुनरेहि तूर्णम् ॥

हारीतः—अहो ! कृतार्थोऽस्मि श्रीगुरुदेवतयोः प्रसादेन । ॐ नमो भगवते श्रीसूर्य्याय । ॐ नमो भगवते गुरवे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



ॐ नमः सवित्रे जगदेकचक्षुषे
जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चिनारायणशङ्करात्मने ॥ (प्रणमति)

ॐ अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ (प्रणमति)

धौम्यः—सर्वतः स्वस्ति वत्साय हारीताय ।

सर्वे—अहो ! आश्चर्यमाश्चर्यम् । क्षणेनैव हारीतस्य रूपमन्यथा संवृत्तम् । अहो ! देवताप्रसादः !

हारीतः—न हि, न हि, गुरोः प्रसादः ।

धौम्यः—वत्स ! हारीत ! दिष्ट्या वर्द्धसे ।

रोगान्मुक्तो भास्करस्य प्रसादात्
रूपं यत्ते पूर्वमासीत्तदाप्तः ।
चित्तं सत्यं निर्मलत्वं प्रपन्नं
यत्नादग्रे काम्यमन्यत्तवास्ताम् ॥

हारीतः—अनुगृहीतोऽस्मि ।

(ततः प्रविशति सोमरातः)

सोमरातः—भगवन् ! एष सोमरातः प्रणमति । एष राज्ञो योधमल्लस्य प्रधानामात्यो ब्रह्मबान्धवो नाम प्रभूतोपहारसमेतो भगवतः पादौ वन्दितुकाम आश्रमद्वारि तिष्ठति । तदत्र भगवान् प्रमाणम् ।

धौम्यः—वत्स ! सोमरात ! प्रियः प्रथमः शिष्यो मे ब्रह्मबान्धवो नाम । तत् त्वरं प्रवेशय ।

सोमरातः—यथाज्ञापयति भगवान् । (निष्क्रान्तः)

धौम्यपत्नी—अहो ! सुचिरादनन्तरमद्य वत्सा ब्रह्मबान्धवो द्रष्टव्य इति परमानन्दमनुभवामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



( ततः प्रविशति ब्रह्मबान्धवेनानुगतः सोमरातः )

सोमरातः—एष भगवानास्ते, तदुपसर्पतु भवान् ।

ब्रह्म—भगवन् ! एष सुचिरात् परं ब्रह्मबान्धवः प्रणमति ।

धौम्यः—वत्स ! स्वस्ति ते ।

ब्रह्म—अम्ब ! एष ब्रह्मबान्धवः प्रणमति ।

धौम्यपत्नी—वत्स ! चिरं जीव । दिष्ट्या चिरादनन्तरं दृष्टोऽसि ।

धौम्यः—वत्स ! अपि कुशलो त्वं सपरिजनः ?

ब्रह्म—भगवता नियतं स्मर्य्यमाणस्य कथमल्पमप्यकुशलं नाम ?

धौम्यः—वत्स ! स्वेन महिम्ना राज्ञः प्रधानामात्यपदे वृतोऽसि, तदतः परम्

प्रेष्येषु साधय दयां भज नाभिमानं
राज्ञो हिताय वृणु सन्ततमर्थशास्त्रम् ।
आचारवान् भव विचारपरः सदा स्याः
कर्त्तव्यनिर्णयकृते न परं विजह्याः ।।
स्वराष्ट्रे परराष्ट्रे च सावधानां धियं दधत् ।
राज्यस्य चिन्तय क्षेमं प्रजोपकृतितत्परः ।।

ब्रह्म—प्रयतिष्ये सर्वमिदं यथादिष्टमनुष्ठातुम् ।

धौम्यः—परं प्रीतोऽस्मि ।

ब्रह्म—भगवन् ! भवत्पादसेवार्थं स्वल्पकं किञ्चिदुपायनमानीतम् । तद् अनुमन्तुमर्हति भगवान् ।

सोमरातः—भगवन् ! न स्वल्पकं तत् । प्रभूतानि भोज्यवस्तून्यानीतानि, येषां वोढारः षोड़श वलवन्तो भृत्याः ।

धौम्यः—वत्स ! शिष्यवितीर्णमुपायनं न प्रत्याख्येयम् । तद् गृह्यते । परं सोमरात ! तदिदं गृहीत्वा तदर्द्धं दीनेभ्यो दीयताम् । अर्द्धञ्चापरमाश्रमवटुभ्यः ।

ब्रह्म—अनुगृहीतोऽस्मि ।

सोमरातः—यथादिशति भगवान् । ( निष्क्रान्तः )

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



( आकाशपथे मूर्त्तिमती गुरुभक्तिराविर्भवति )

गुरुभक्तिः—वत्सा उपमन्युप्रमुखा गुरुभक्तमूर्द्धन्याः ! एषा गुरुभक्तिरहं युष्मानाशिषा वर्द्धयितुमुपागता ।

युष्माकमायतनिरामयमायुरस्तु
चित्तेषु वो निरुपधिर्गुरुभक्तिरस्तु ।
कल्याणमस्तु विपदां नियतं लयोऽस्तु
शिष्ये गुरौ च यशसामभिवृद्धिरस्तु ॥ ( अन्तर्हिता )

धौम्यः—अये ! मूर्त्तिमती गुरुभक्तिः !

सर्वे—भगवति ! नमस्ते । ( दृष्ट्वा ) अहो ! कथमन्तर्हिता !

धौम्यः—अयि ! कात्यायनप्रमुखा मे वत्साः !

व्यापत्तयो लयमिताः प्रतिभान्ति विद्याः
श्रद्धाफलं सकलमेव करे प्रपन्नम् ।
प्रत्यक्षतामुपगता गुरुभक्तिरेषा
किं वापरं प्रियमितो ननु काङ्क्षितं वः ॥

आरुणिहारीतकात्यायनोपमन्यवः—भगवन् ! किमतः परमपि प्रियमस्ति ? तथापीदमस्तु भगवत्प्रसादात् ।—

दीना दैवतभारती गुणवती सालङ्कृतिः सत्पदा
सौभाग्यात् सरसा रसाय जगतामास्तां विशिष्टक्रमा ।
निःसङ्गा विहरन्तु शास्त्रवलये धीराश्चिरं योगिनः
सर्वेषां नयशिक्षणे गुरुपदं यायात् सदा भारतम् ॥

सर्वे—ॐ जयन्ति नः श्रीगुरुपादरेणवः ।

यवनिकापतनम् ।

समाप्तमिदं रूपकम् ।

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# यत्किञ्चित् सुखलेखनीयम्

निबन्धकः—श्रीरामधनशास्त्री

परम-कारुणिकस्य भगवतः करुणया समतीत्य प्रत्यूहव्यूहान् समाप्तिमाप्तं 'सुखलेखन'ग्रन्थस्य सम्पादनम्। ग्रन्थस्यास्य रचयिता गौराङ्गमल्लिकात्मजो भरतो जन्मना वर्द्धमानस्थं मल्लिकवैद्यवंशमलञ्चकार। कविवरोऽयमेकविंशत्यधिकवर्षशतकात् प्रागवर्त्तत इति ग्रन्थान्तरसंवादेनानुमीयते। विपश्चिदुत्तमस्यास्य रचयितुः संस्कृतशास्त्रेषु प्रगाढ़ं पाण्डित्यमिह को वा न जानाति विद्वज्जनसमाजेषु। ग्रन्थकर्त्रानेन रचिताः सन्ति बहव एव ग्रन्थाः। तेषु भट्टिकाव्यमुग्धबोधव्याकरणादीनामुपरि टीका उपसर्गवृत्तिकारकोल्लासद्रुतबोधव्याकरण-सुखलेखन-प्रभृतयो मौलिका ग्रन्थाश्च सविशेषमुल्लेखमर्हन्ति। एषु च केचित् प्राक् प्रकाशिताः कतिपये च पुनरेतावत्कालपर्य्यन्तमप्यप्रकाशा एव। सुखलेखनमपीदमप्रकाशमेवासीदितः पूर्वम्। यत् किञ्चित् नूतनं वस्तु समुद्भावयितुमनसां मनसि सततमेव समुदेति भावः किं नो नूतनं करणीयमस्तीति। अहमप्येवमेव मनोगतं भावं परिपुष्णन्नेकदा संस्कृतसाहित्यपरिषदा मदेकहितैषिभिर्विद्वद्वरिष्ठैः श्रीमद्दुर्गामोहन-भट्टाचार्य्य-काव्यसांख्य-पुराणतीर्थ-एम, ए-महोदयैश्च समनुरुद्धोऽभवं सुखलेनग्रन्थस्यास्य सम्पादनाय। किं बहुना सांख्यतीर्थमहाभागैर्मे पुस्तकमप्येकमादर्शभूतं प्रदत्तं सम्पादनकार्य्यनिर्वाहार्थं सहैव तदनुरोधेन। इमामनुरोधपरम्परामुपेक्षितुमपारयन् कर्त्तव्यबुद्ध्या सांख्यतीर्थमहाभागप्रदत्तमेकमेवादर्शमवलम्ब्यात्याशया सम्पादनकार्य्यं मनो ददानस्तस्यादर्शस्य भ्रान्तिपूर्णतया वस्तुतः कष्टां दशामुपागतः सम्पादनकार्य्यं किंकर्त्तव्यविमूढोऽभवम्। किमन्यत्, नाम्ना सुखलेखनमपीदं तदानीं मे दुःखलेखनमिवाजनिष्ट।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अथ गच्छति कियति काले दत्तभारया संस्कृतसाहित्यपरिषदा पुनः-पुनरनुस्मारितोऽभवं सम्पादनकार्य्यस्याशु समनुष्ठानाय। किन्तु विना-दर्शान्तरं कार्य्यमिदमतिदुष्करं मन्यमान आदर्शान्तरान्वेषणतत्परः परिषद्ग्रन्थशालातः समधिगतवानपरमेकं खण्डितमादर्शम्। तस्याभ्यन्तरे च लब्धवानेकपत्रात्मकमादर्शान्तरमप्यतिजीर्णम्। एवञ्चाखण्डितं सांख्य-तीर्थप्रदत्तमादर्शं विना खण्डितमादर्शद्वयं संस्कृतसाहित्यपरिषद्ग्रन्थ-शालातोऽधिगतमिति साकल्येनादर्शत्रयं लब्ध्वा कर्त्तव्यसम्पादने बहुलामाशां परिपुष्णामि स्म। परं साप्याशा खण्डितयोरेतयोरादर्शयोः प्रमाद-बाहुल्येन नैव मनोऽनुरूपं साफल्यं लब्धवती। ततश्च साहसमाश्रित्य शास्त्रान्तरदृष्टिमात्रसहायोऽतिकष्टेन सम्पादनकार्यं निरवाहयम्।

नातिचिरमेव परिषद्ग्रन्थशालया समासादितेषु स्वर्गतदीनेशचन्द्र-भट्टाचार्यमहोदयसंकलितेषु हस्तलिखितग्रन्थेषु लब्धमप्येकं सुखलेखनं यन्मे सम्पादनकार्ये किमपि साहाय्यं न कृतवादिति निन्दामो भूयोभूयो भाग्य-विधातारम्। मन्ये तादृशग्रन्थान्तरलाभश्चेत् सम्पादनसमये समभविष्यत, तदा तत्कार्यमप्यतिसुकरमभविष्यत।

ग्रन्थकारेणैतस्मिन ग्रन्थे प्रथमतो व्याकरणस्य षत्वणत्वविषयिणी प्रक्रिया, तदनन्तरमेकतालव्य-द्वितालव्य-तालव्यमूर्द्धन्यादिविधया शब्दाना-मर्थतो भेदः, ततश्च प्रायेण समोच्चारितानां शब्दानामर्थतो लिङ्गतश्च वैशिष्ट्यम्, शब्दानां वर्णविन्यासविषये प्रचलितव्यवस्थातो व्यवस्थान्तर-ञ्चेत्येवमादयो वैशिष्ट्यावहा विषयाः समुपनिबद्धाः। एवञ्च ग्रन्थस्यास्य एकतो व्याकरणत्वमपरतश्च कोषत्वमिति द्वयी गतिरापतिता। ततश्चा-भिनवत्वमप्यस्य सिद्धमेव।

ग्रन्थोऽयं सम्यगधिगतश्चेत तदा विदुषां लेखनादिकार्येषु सुमहत साहाय्यमनुतिष्ठेदिति ग्रन्थस्यास्य सुखलेखनमिति नाम्नोऽपि सार्थक्यं यथार्थत एव परिस्फुटम्।

सम्पादनकार्य्येऽस्मिन व्यवहृतानां त्रयाणाम दर्शानां सङ्केतव्यवस्था तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वक्ष्यमाणरूपा। सांख्यतीर्थमहोदयप्रदत्तस्यादर्शस्य Ms इति, परिषद्-ग्रन्थशालातो लब्धस्य पत्रत्रयात्मकस्य नाममात्रशेषस्यैकपत्रात्मकस्य चादर्शस्य यथाक्रमं B तथा A नाम्ना निर्देशः कृतः।

स्मर्य्यते च सम्पादनकार्य्ये साहायकमनुतिष्ठतां मदीयाध्यापकानां महामहोपाध्यायश्रीयुक्तकालीपदतर्काचार्य्यपादानां श्रीयुक्तउपेन्द्रमोहनसांख्यतीर्थमहाभागानामपरेषाञ्च श्रीदुर्गामोहनभट्टाचार्य एम्‌ए काव्यसांख्य-पुराणतीर्थ-श्रीयुक्तचिन्ताहरण-चक्रवर्त्ति-काव्यतीर्थ एम्‌ए प्रमुखानां दानम्। एतेषां विशेषतः संस्कृतसाहित्यपरिषदः साहाय्यमन्तरेण सम्पादनकार्य्यमिदं सर्वथा व्याहतमेवाभविष्यदिति कृतज्ञतामेषु भूयो भूयो निवेदयामः।

ग्रन्थसम्पादनव्यापारे भ्रमप्रमादादयो निसर्गत एव स्युरित्यत्र को वास्ति वितर्कः? तस्मात् प्रार्थयामहे सुधीभिश्चेत्तत्तद्भ्रमप्रमादादयः क्षम्येरन् सकृपं च संशोध्येरन्, तदैवात्र मे परिश्रमः कणमात्रामपि सफलतामीयात इति शम्।

१३६३ वङ्गाब्दीय—
महाविषुवसंक्रान्तिः

## शुद्धिपत्रम्

| अशुद्धाः | शुद्धाः | पृष्ठासंख्या | पंक्तिसंख्या |
|---|---|---|---|
| ०वश्मयः | ०रश्मयः | ४५ | ८ |
| शेफः | शेपः | ४६ | २ |
| ०त्रिंशत् | त्रिंशत | ४६ | ७ |
| ततथा | तथा | ४८ | ७ |
| पुष्पविशेषः | वृक्षविशेषः | ४८ | १७ |
| प्रतिज्ञा | प्रतिध्वानम् | ४८ | १८ |
| Mss | Ms | ( पादटीकासु सर्वत्र ) | |

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


9. **Introduction to the Rigveda** of Sayanacharya—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4. for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As. 14; As. 10 (for member-

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahopadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramasnath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A. Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16 **Yatratattvam** of Raghunandana Bhāttacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakra, varti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof. Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-3 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members),

24. **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kali ada Tarkach rya, Rs, 5; Rs, 4-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXX.
No. 4
४०श-वर्षस्य
४र्थी-संख्या

August 1957
१८७६शकीये
श्रावणे
मासे

भारते भातु भारती

# संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुरा

वार्षिकमूल्यम्—रूप्यकषट्कम् ६)
Foreign price—1-4p

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# विज्ञापनम्

## विशेषतो द्रष्टव्यम्

संस्कृतसाहित्यपरिषदः चतुःषष्ट्यधिकत्रयोदशशततम-( १३६४ ) वङ्गाब्दीयं वार्षिकं मूल्यं ( Annual Subscription ) यैर्ग्राहकमहोदयैरेतावत्कालपर्यन्तं न परिशोधितं, तैः कृपया सत्वरं तत् प्रेषणीयम्। अन्यथा (V. P.) डाकयोगेन प्रेरणे व्ययाधिक्यं भविता। अतः परं यैस्तावदस्याः परिषदः सदस्यपदावस्थानं नेष्यते तैर्वयं तूर्णं विज्ञापनीयाः। इति—

विनीत—संस्कृत-साहित्य-परिषत्-सम्पादकानाम्

१६८।१, राजा-दीनेन्द्रष्ट्रीट,

संस्कृतसाहित्यपरिषद्-भवनम्, कलिकाता—४

## Sanskrit Sahitya Parishat Series

**(Revised up to April, 1951)**

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1-4 ; Re. 1. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshinacharan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kali pada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshina charan Bhattacharya. Rs. 2-8 ; out of stock.

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

(Cont. to Cover 3rd Page)

Printed by Bishnupada Bhattacharya M.A. Kabyatirtha. at Calcutta Oriental Press Private Ltd., 9, Panchanan Ghose Lane, Calcutta 9 and Published by the same from Sanskrit Sahitya Parishad, 168/1 Raja Dinendra Street, Shyambazar Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

# संस्कृतसाहित्यपरिषत्

Vol. XXXX. No. 4 | १८७९-शकीये श्रावणे ४०श-वर्षस्य ४र्थ-संख्या | August 1957.

## मतिमञ्जरी

### कर्मविरतिघोषणा

[ निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः ]

अस्य भारतराष्ट्रस्य लिपिद्रुतवार्ताप्रेरणकेन्द्रीयकर्मचारिभिस्तेषां दुर्गतिं राष्ट्रसविधे पुनः पुनः सविनयं विज्ञापयद्भिरलब्धप्रतीकारैर्दुःखितान्तःकरणैरगत्या सर्वसम्मत्या कर्मविरतिरुद्घोषिता। अन्या अपि काश्चन संस्थास्तथैव मनोभावसम्पन्ना दरीदृश्यन्ते कृत्योद्योगिन्यः। विलुप्तजातिभेदे भारतेऽधुना श्रमिकधनिकजात्योर्विरोधः समुपस्थितः। धनसाम्यवादोऽन्तरान्तरा शयसङ्केतं श्रयति। अभीप्सितलब्धस्वाधीनताके देशे कथं सचिवा न प्रीतियुताः? कथं देशभ्रातरः परस्परं प्रीत्या न प्रीणयन्ति? किमत्र निदानम्? अभावः सुतरामसन्तोषः? अभाव इति कस्याभावः? नित्यावश्यकद्रव्याणामिति चेत् तत किमसन्तोषेणैव तत्समाधानं सुकरम्? वस्तूनां वस्तुतोऽभावे सम्भूय तदुत्पादनवृद्धिः करणीया। तदर्थं च कर्तव्यभारः सर्वेषामुपरि निपतितः, न राष्ट्रस्य, न व्यक्ति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



विशेषस्य वा। यदि द्रव्याणि सन्ति विभागोऽपक्षपातेन न भवतीति तत्र वा किं कारणम्? एवं कारणपरम्परानुसन्धाने मनुष्यत्वसम्पादनकारिण्याः शिक्षाया एवाभावः प्रतिभास्यति। अथचाधुनिकशिक्षितयुगे एतदपि वक्तुं नास्ते साहसं कस्यापि। यदा मातृकुलाशनि-(Matriculation) परीक्षायां शतसहस्रसंख्या विद्यार्थिनो विफलमनोरथा भवन्ति तदानीं शिक्षाया अभावः? किमुच्यते? दुर्नीत्या परिपूरिता धरित्रीति? तदपि किं शिक्षाया अभावेनेति वक्तुं न शक्यते? अत एव नासन्तोषेण न भीतिप्रदर्शनेन,-न न्यक्कारजनकवाक्यप्रयोगेन,-न हठकारिताशक्तिप्रदर्शनेन वा समाधानमेतस्य भविता कदाचित्। राष्ट्राधिकारे नियुक्ता ये नाम स्वल्पसंख्यकाः सज्जना वर्तन्ते ते सवदा सर्वथा दुर्नयप्रतिरोधाय कृतप्रयत्ना दृश्यन्ते किन्तु सर्वेषां साधुबुद्धिर्यावन्नोदेष्यति तावदसम्भवं समाधानं सङ्कटस्य। साम्प्रतं राष्ट्राधिकारिणः प्रभुकक्षायां स्वाधीननागरिकाश्च भृत्यकक्षायां वर्तन्ते, स एष धनिकश्रमिकजातिभेदः प्रथमतो निराकर्तव्यः। प्राचीने भारते वर्णविभाग आश्रमविभागश्चास्ताम्। तदानीं वर्णानां कर्मव्यवस्थयाश्रमभेदेन जीविकानिर्वाहव्यवस्थया च सर्वं सुसमञ्जसमासीदधुना पाश्चात्त्यादर्शेन यद्यत कर्तुं यत्यते तत् स्वर्णमयप्रस्तरपात्रनिर्माणप्रयासयत् न संघटते। एवमधुना सङ्कटे मुहूर्ते परस्परमविश्वासभावो निराकार्यः। राष्ट्राधिकाराणां साधुप्रस्तावो न स्वीक्रियते तदन्यै, र्नागरिकाणामपि साधुवादो नैव गृह्यते राष्ट्राधिकारैः। अहमहमिकाया अवकाशो दुर्गते बुभुक्षानिपीड़िते भेदजर्जरिते देशे न दातव्यः। यदुपायेन राष्ट्रसेवका नागरिकाश्च स्वाधीनतायाः सुखामृतं स्वादयेयुर्येन कौशलेन दुर्दशा दुर्दशाग्रस्ता भवेत् येन प्रयोगेन गणतन्त्रस्य मर्यादाव्याहता रक्षिता भवेत् समुन्नतिश्च भवेत् स्वराष्ट्रस्य यद् दृष्टान्तबलेन परराष्ट्रमपि नियमितं स्यादनुकुर्याच्च देशस्यास्यादर्शं समाचरणीयोऽधुना स एव समुदाचारः। राष्ट्रसेवकेषु समधिकसंख्यकानां यथार्थतो जीविकानिर्वाहो दुष्करः सञ्जातः। तदर्थमनुकूलः सहृदयतायाश्च भावः प्रदर्शणीयोऽवम्बलनीयश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राष्ट्राधिकारैः। तेऽपि सर्वेऽस्माकं स्वाधीनभारतस्य नागरिका भ्रातरश्च। तदेवमनुकूलभावो यया रीत्यावर्जितो भवेत् सैव रीतिरनुसरणीया। विविधा रन्ध्रान्वेषिणो विद्यन्ते भारतभूमातृकायाः। तत्रान्तर्भेदसूत्रमवाप्य यदि ते मातृमन्दिरं दूषितं त्रिदध्युस्तदा केनोपायेन वयं भारतयोग्यतनया जगति मुखं दर्शयामः। स्वस्थचित्तेन बुद्धिमद्भिश्चिन्तनीयं, नास्ते विलासस्यात्म-वञ्चनायाः प्रतीकारग्रहणस्य वावसरः। स्वमर्यादाया राष्ट्रमर्यादा गरीयसी समपेक्षिततरा च। विधानानुगतं राजतन्त्रमपि कल्याण-जनकं, गणतन्त्रे च न तदवकाशः किन्तु बहुनायकत्वमपि न कदाचित् क्षेमाय। मतिभेदनियतत्वात् सर्वसम्मत्या किञ्चित् सम्पादनमपि दुष्करम् अत एव कार्याकार्यव्यवस्थापकं कल्याणोदर्कं शास्त्रं समवलम्बनीयं येन समापतितायाः सर्वजनानाकाङ्क्षिताया विपदो विमुक्तिः सम्भविष्यतीत्ये-तदर्थं प्रेम्णा निपीड़ितम्मन्यानां पीड़ा संहर्तव्येत्यपेक्ष्यतेऽस्माभिः सर्वथा राष्ट्रस्य पुण्यमयस्य भारतस्य मङ्गलं भूयादिति।

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# प्रावृट्-पञ्चकम्

निबन्धकः—अध्यापक-श्रीदुर्गादासगोस्वामी, एम. ए. साहित्यशास्त्री

मेघाडम्बरमम्बरं वितनुते स्निग्धाञ्जनव्यञ्जनं
श्यामश्रीर्वनभूर्विभान्ति ककुभश्छायाभिरामप्रभाः ।
भ्रूभङ्गैः सुभगाङ्गनेव च तड़िद् गर्जत्यमन्दस्वनै-
र्निस्तब्धा प्रकृतिः श्रयत्यपि कमप्यासन्नवर्षोद्यमम् ॥१

निर्घोषै रथचक्रघर्घरनिभैः प्रत्यक्षसंघर्षजै-
र्वर्षाकर्षणघोषणां प्रतिदिशं विस्फारयन्तोऽनिशम् ।
स्वच्छन्दं जनमानसेष्वनुभवानानन्दभीतिव्यथा-
व्यामिश्राञ्जनयन्त एव च वियत्याविर्भवन्त्यम्बुदाः ॥२

शुक्लापाङ्गगणं भुजङ्गनिवहं मातङ्गयूथं पुनः
सारङ्गप्रसरं कुरङ्गनिकरं किञ्च प्लवङ्गव्रजम् ।
धाराभिर्मुखरञ्ध्वनिभ्रमकरैरभ्रस्वरैश्च क्षणाद्
विश्वं विह्वलयन्नपि प्रमदयन्नभ्येति वर्षोत्सवः ॥३

प्राप्तैश्वर्यवती पुनर्वसुमतीं प्रावृट् प्रशस्योदया
सिञ्चन्ती द्वयमप्यसौ घनरसासारैर्वनं यौवनम् ।
कृत्वा योगि बधूवरं परिमलोद्गारैरदभ्रैस्तथा
यूथीजातिकदम्बकेतकशिखासर्जार्जुनादीरितैः ॥४

सान्द्रच्छायतमालनीलनभसि व्यक्ता बलाकावली
धाराम्भः क्षतपल्वलेषु मुखराः कोलाहलैर्दर्दुराः ।
हर्षोत्कर्षजुषः कृषीबलजनाः सर्वे च सङ्गीतसुकाः
किन्त्वेके विरहातुराः प्रणयिनश्चिन्ताप्रतान्तान्तराः ॥५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# स्वातन्त्र्य-सन्धिक्षणम्

[ निबन्धकः—श्रीश्रीजीवन्यायतीर्थः, एम.ए. ]

पूर्वानुवृत्तम् ।

नव्याः । कथ्यतां कथ्यतां सम्प्रदद इति ।

आः प्र० । अहो वराका माहम्मदा न दृश्यन्ते ।

हा हा ! नेत्रे वारिपूर्णे मदीये
तेषां स्मर्त्तुं प्रेम माहम्मदानाम् ।
दुष्टा राजद्रोहिणो हिन्दवश्चेत्
कर्त्तारः स्युर्हन्त तेषां गतिः का ?

नाहमिदानीं स्वातन्त्र्यदानमिच्छामि ( इति कुशादिकं पुनः कच्चु कक्षे स्थापयति )

नव्याः । अस्मत्सहोदरा माहम्मदास्तान् सन्तोष्य वयं कृतार्था भविष्यामः । तदलं चिन्तया ।

आ० प्र० । न वयं परवचनप्रत्ययाः । यावत्तान् प्रत्यक्षीकरोमि ।

( निष्क्रान्तः )

प्रा० सं । युवानः ! कथं विस्मरथाङ्गलानां गूढमभिसन्धिम् । मा तावद् भिक्षादैन्यमूरीकुरुत !

( ततः प्रविशन्ति विकटाकारा दुर्भिक्षदुर्णयकलहाः )

दुर्भिक्ष-दुर्णय-कलहाः । (नृत्यं नाटयन्तः)

वयमिह दूताः
आङ्गलमङ्गल-साधनभूताः ।
भारतवर्षं हृतचिरहर्षं
वञ्चित-निजबल-बुद्धिविमर्षं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कुर्मो वयमाहूताः ।
श्वेतप्रभुगुणगानमहिम्ना
विश्वविकस्वरदानगरिम्णा
स्यामः परमं पूताः ।

दुर्मति-दुर्णय-कलह-करालं
तनुमो नूतन-मायाजालं
पृथिवी येन स्यूता ॥

कलहः । अरे दुर्भिक्षदुर्णयौ ! भारतीयैः स्वातन्त्र्यमङ्गीकृतञ्चेद् वयमपि हताः स्यामः । तदाशु सृज्यतां तत्र महती बाधा ॥

दुर्भिक्षः । श्रूयताम्—
वर्द्धयन्नुदरज्वालां गर्द्धयन् परसम्पदम् ।
स्पर्द्धयन् भगवत्-सत्तां मर्द्दयामि हि भारतम् ।

दुर्णयः । अरे दुर्भिक्ष महोदय !
त्वत्पृष्ठतस्तिष्ठति दुर्णयोऽयं
स्तेयानृतासंयमवर्द्धनाय ।
अन्तः प्रजामण्डलमानसस्य
भेदज्वरैर्जर्ज्जरमाशु कर्त्तुम् ॥

कलहः । एष त्वदीयसहकारिसुहृद्वरोऽहं
सर्वत्र सङ्घनिचये रचये विवादम् ।
सौधे तदङ्गघटकेष्टकचालनावद्
धर्मेऽपि मर्मभिदुरस्थितिमानयामि ॥

प्रा० सं । अहो ! क एते पुरुषा दुर्मन्त्रणापरायणा भारतीयमकल्याणं चिन्तयन्ति । भवतु, एकान्ते स्थित्वा पश्यामि

( एकान्ते स्थितिं नाटयति )

नेपथ्ये कलकलः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


कलहः । मधुरा मधुरा स्थितिर्मता
करदानां भरतावनीभृताम् ।
बहलः कलहानलश्चलन
सकलाशालतिकां दहत्यहो !

इतोऽपि माहम्मदाः पाकिस्थानरचनां विना न तुष्यन्ति । वयमिदानीं तिरस्करणीच्छन्नमूर्त्तय आङ्गलमात्रदृश्या भारतस्वराज्यकामिनां स्कन्धमाश्रयामः ।

ततः प्रविशति भारतमाता

भारतमाता । म्लेच्छैरनुल्लङ्घितगौरवस्य गौरीगुरोराशिष आशु लब्धाः ।
कदा न जाने जितनागपाशं जहामि दीर्घं निजपारतन्त्र्यम् ॥

(प्रविश्य) नव्याः । स्वाधीनतानिधिं मातर्विधिना परिवेषितम् ।
ग्रहीतुमेहि नः पार्श्वं पाशं वैदेशिकं त्यज ॥

( इति दक्षिणकरमाकर्षति )

प्रविश्य माहम्मदः । मम निअडं समुवजाहि पविट्टट्ठाणं करेमि दे अङ्गं ।
गोव्वम्भणसदीणं सददास्समोअणधम्मेण ॥

[ मम निकटं समुपयाहि पवित्रस्थानं करोमि ते अङ्गम् ।
गोब्राह्मणसतीनां सततास्रमोचनधर्मेण ॥]

[दुर्भिक्षं दुर्णयश्च नव्ययोः स्कन्धमारोढुं कलहश्च माहम्मदस्कन्धमारोढुं चेष्टन्ते ]

[एकतस्तरुणा वामकरं माहम्मदो भारतमातुः दक्षिणकरं सबलमाकर्षन्ति]

भा० मा० । हा दैव ! तनयानां पीडनमपि दुःसहं संवृत्तम् ।

नव्याः । मातः प्रसीद । मादृशां समोपस्थितिमङ्गीकुरु । पारतन्त्र्यं ते दूरीभविष्यति ।

माहम्मदः । ण दे सतन्त्रत्तवणं माणेमि जइ मम णिअड़े ण चिट्ठसि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



[न ते स्वातन्त्र्यं मानयामि यदि मम निकटे न तिष्ठेः]

भा० मा०। कोऽयं युष्माकं निर्बन्धः। एकाहं कथं द्विधा भूत्वा द्वयोः पुत्रयोः सन्तोषं विधास्यामि ?

प्रा० सं। मातर्नमस्ते ! चिरमन्वेषयामि त्वाम्। त्वदीयदुःखदूरीकरणाय किञ्चिदेतान् विज्ञापयामि। भ्रातरः ! विरमत मातुरङ्गाकर्षणात्। अलं परपाशबन्धनदुःखदग्धामपि मातरं पुनः पीड़यित्वा।

नव्याः। का त्वं ललने ! चिरमस्माकं प्रगतेर्विघ्नमुत्पादयसि ?

माह०। मादुणो सुहासुहविआरे अह्मे प्पहआमो, ण तारिसी इत्थिआ [मातुः शुभाशुभविचारे वयं प्रभवामो न त्वादृशी स्त्री]

प्रा० सं। किं न ममापि मातेयम् ?

भा० मा०। प्राच्यसंस्कृते ! विरम त्वमिदानीम्। न ते वचनमाकर्णयति कोऽपि।

नव्याः। किं नाम त्वमेव प्राच्यसंस्कृतिः ? अस्माकं प्रगतिरोधिनी। भारतवासिनां दीनतायास्त्वमेव मूलम्। तत्त्वां दूरीकुर्मः श्वेताङ्गमाहम्मदादिभिः सह सम्भूय वयम्।

प्रा० सं। भो ! अनात्मज्ञा भ्रातरः ! ममैव कृपया परवशतादशायामपि स्वाधीनतानिधिं मनोमञ्जूषायां रक्षथ यूयम्। अन्यथा माहम्मदानामिव युष्माकं धर्मान्तरपरिग्रहेण दासोचितदीनभावः प्राभविष्यत्।

माह०। किं कधेसि धिट्ठे महिले ! अह्मे धम्मन्तरीकिदाओ दासाओ ? एरिसस्स दुव्वअणस्स उइदं दण्डं दे दइस्सं।

[किं कथयसि धृष्टे महिले ! वयं धर्मान्तरीकृता दासाः ? ईदृशस्य दुर्वचनस्य उचितं दण्डं ते दास्यामः]

धनेशः। भ्रातः ! विरम त्वमिदानीम्। वयमेव पश्चात् प्राच्यसंस्कृतिं यथोचितं शिक्षयिष्यामः ! आगच्छ साम्प्रतं भारतभूजननीस्वातन्त्र्यमवधारयामः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



माहम्मदः ? मम एक्कं वअणं पाकिट्ठाणं तं अङ्गीकलध। अण्णधा सतन्तत्तणं विघड्डिदं होदु। [ममैकं वचनं पाकिस्थानं तदङ्गीकुरुत, अन्यथा स्वातन्त्र्यं विघटितं भवतु। ]

प्रा० सं। मूर्खजल्पितमिदम्।

नव्याः। त्वं तूष्णीं भव। का त्वं स्वातन्त्र्यस्य स्वीकरणे प्रत्याख्याने वा।

भा० मा०। प्राच्यसंस्कृते! न त्वदवमाननं सोढुं शक्नोमि, तूष्णीं भव।

प्रा० सं। जननि! मा उत्तास्य। अहमिदानीमेतैः सह विवदमानापि महतोऽनिष्टाद्रक्षितुमिच्छामि भवतीम्। यावन्ममानुरक्तान जनानाह्वयामि। ( निष्क्रान्ता )

नव्याः। भो माहम्मद! परित्यज्यतां पाकिस्थानचिन्ता। आगच्छ मिलित्वैव वयं भारतमातुः स्वातन्त्र्यं रचयामः॥ ( इति मातरमाकर्षन्ति )

माहम्मदः। ( कलहः तत्स्कन्धभरं नाटयति )

पाकिट्ठाणट्ठावनं णो प्पड्डिण्णा
उण्णोण्णेहिं शोणिदेहिं जएह्म।
युज्झन्तो णं दाव अह्मे ण भीदा
सम्पादेदुं सव्वधा इट्ठकज्जं॥

[ पाकिस्थानस्थापनं नः प्रतिज्ञा, उष्णैः शोणितैर्जयामः।
युध्यमाना ननु तावद्वयं न भीताः सम्पादयितुं सर्वथा इष्टकार्यम् ]

नव्या। युध्यस्व वा न वा, तथापि पाकिस्थानं न वयं स्वीकुर्मः। ( इति दूरं गच्छन्ति )

माहम्मदः! अरे रे दुट्ठा न मं जानीध।
[अरे रे दुष्टाः! न मां जानीथ ] [इति छुरिकां दर्शयति ]

नव्याः। भो माहम्मद! सत्यमेव युध्यसे? [ तस्य हस्ताच्छुरिकां आच्छेत्तुं यतन्ते ]



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



( प्रविश्यति आङ्ग्लप्रतिनिधिः । )

आ० प्र० । ( प्रविश्य ) भारतीया मुञ्चतैनं वराकम् !

नव्याः । अयं प्रथम आततायी, नासौ वराकः ।

आ० प्र० । आम् आम् । अयमेकः संख्यालघुः, यूयं त्रयः संख्यागरीयांसः ।

नव्याः । वयमहिंसाव्रताः ।

आ० प्र० । तथापि पाकिस्थानविरोधिनः ।

नव्याः । किं भवान् पाकिस्थानसमर्थकः ?

आ० प्र० । अन्यथा नास्त्युपायान्तरम् । एतदर्थमेव नास्माभिः पूर्वं स्वातन्त्र्यं दत्तम् । इदानीमुच्यताम् किं मयैव युष्माकं मीमांसा करणीया, उत प्रवृत्तं युद्धं कस्यचित् पक्षस्य विजयावधि प्रतीक्षणीयम् ।

नव्याः । स्वातन्त्र्यमस्माभिरवश्यं ग्रहीतव्यम् । ( इति भारतमातुः करमाकर्षति )

महम्मदः । पाकिट्ठाणं अह्मेहिं णिच्चएण जेदव्वं त्ति । (इति मातुः करमाकर्षति)

[ पाकिस्थानम् अस्माभिनिश्चयेन जेतव्यमिति ] ।

भा० मा० । प्रियेऽहं हतभाग्या ।

आ० प्र० । ( नेपथ्याभिमुखं दृष्ट्वा ) अहो सर्वत्र साम्प्रदायिकयुद्धं रुधिरस्रोतश्च दृश्यताम् ।

नव्याः । तर्हि त्वयैव तावत् क्रियतां विवादनिर्णयः

( आङ्ग्लप्रतिनिधिः कटिदेशादसिं निष्काश्य भारतमातुः शिरसि पादे च प्रहरति ) ( निष्क्रान्तः )

भा० मा । अहो प्रियेऽहं प्रियेऽहम् ( इति मूर्च्छति )

( सहसा-प्रविशति प्राच्यसंस्कृतिः यतिराट् च )

नव्याः । प्राच्यसंस्कृतेः सहायकः कोऽयं दण्डी समागतः ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यति० । कथं विखण्डिता भारतभूजननी मूर्च्छिता च ! अहो कठोरा वृत्तिरेषाम् ।

प्रा० सं । भो भो नव्याः ! शोच्येयं जननी, गौरिव न च्छेदमर्हति कस्मिन्नप्यवयवे ।

( क्रमशः )

---

# वार्त्तावर्त्तिका

सुमहदिदं प्रमोदकारणं यत "वेलगाँव" १०६४ अनन्तशयनगल्ली-त्याख्यस्थानात् विद्याकार्यालयतः पण्डितशिरोमणिवेदान्तकेशरीतिविरुद-भूषितैः श्रीप०वरखेडनरसिंहाचार्यैस्तथा साहित्यरत्नेतिविरुदभूषितैः श्रीप० गलगलीरामाचार्यमहोदयैः सम्पादिता "विद्या"नाम काचन संस्कृतभाषा-मयी मासिकपत्रिका विद्येव विद्योतिता सर्वेषां सज्जनानां मनांस्यावर्जयिष्य-तीति नास्ति सन्देहप्रसरः । दक्षिणापि दुर्दिने स्वल्पैव रूप्यक-त्रयात्मिका निर्धारिता त्रिंशत्पत्रात्मिकायाः पत्रिकायाः । निबन्धादीनि यान्यत्र प्रकाशितानि तानि प्रायः सुजनचित्तसमाह्लादीनीति, वर्तमानसमये भारतस्य विशेषमर्यादारक्षणार्थं संस्कृतभाषायाः साहित्यस्य नवोद्भावितस्य तत्त्वस्य च विवेचनार्थं संस्कृतपत्रिकायाः सुबहुलप्रचार आवश्यक एवेति सम्पादकेभ्यः परिचालकेभ्यश्च सहस्रशः साधुवादाः प्रदीयन्ते । काम्यते च पत्रिकायास्तथा सम्पादकसंघस्य सुदीर्घजीवित्वं परमेशसमीपे ।

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# वेदान्तविमर्शः

( प्रथमभागः )

[ निबन्धक :—श्रीचारुकृष्णदर्शनाचार्यः ]

( पूर्वानुवृत्तः )

समाधिश्च निरन्तरध्यानाद् ब्रह्मणो दर्शनम् "आत्मा वा अरे द्रष्टव्य" इति श्रुतेः, भामतीकारोऽप्येवम्। जीवपरमात्मनोरभेदस्य च समाधित्वमुक्तं योगिभिरेव तथा च योगियाज्ञवल्क्य :—

"समाधिः समतावस्था जीवात्मपरमात्मनोः।
ब्रह्मण्यवस्थितिर्या सा समाधिः प्रत्यगात्मनः॥
सरितपतौ निविश्याम्बु यथाऽभिन्नत्वमाप्नुयात्।
तथात्माऽभिन्न एव स्यात समाधिं समवाप्य चे"ति॥

सविकल्पनिर्विकल्पभेदेन व्यवस्थापि तेषामेव। भगवान् पतञ्जलिस्तु "तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिरि"त्याह। ध्येयमात्रविषयं ध्यानमेव समाधिरित्यर्थः। भावनाप्रचयात ध्यातुर्ध्यानस्य च त्यागेन ब्रह्माकारायाश्चित्तवृत्तेस्तीव्रतायां तन्मयतापत्तौ स्यादेव प्रत्ययोऽहं ब्रह्मास्मीति। ततश्च तत्कार्यानुकरणं यथा वामदेवस्य, तथा च श्रुतिः "एतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवती"ति। सूत्रं च "शास्त्रदृष्ट्या तूपदेशो वामदेववदि"ति। यथा च महात्मनः प्रह्लादस्य, तदुक्तं श्रीभागवते—

"क्वचित तद्भावनायुक्तस्तन्मयोऽनुचकार ह" इति

तथा—"तदा पुमान् मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशयाकृतिः।
निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम्"॥ इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भद्रासनवीरासनादिपारिभाषिकासनान्यपि योगस्यैवाङ्गानि न श्रौत-ज्ञानस्येत्यासीनस्यैव ध्यानसम्भवात् यथासम्भवमुपविश्यैव ध्यानं कार्यम्, तदुक्तम् "आसीनः सम्भवादि"ति । अत्र श्रुतिमनुक्त्वा सम्भवस्य हेतुत्वोक्तेर्वीरासनादयो योगागमोक्ता एव न वेदान्तसम्मता इति ते नापेक्षणीया वैदिके ज्ञाने । न च प्राणायामोऽप्युक्त आचार्येण, श्रुत्यभावात् । अहिंसादयश्च "मा हिंस्यात् सर्वा भूतानि" "सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग् ज्ञानेन ब्रह्मचर्येण नित्यम्" "मा गृधः कस्यस्विद्धनम्" इति श्रुतिभ्य एव प्राप्ताः । नित्यनैमित्तिककर्मजातेभ्य एव चित्तस्य संशुद्धेर्न हठयोगिनामिव प्राणायामप्रत्याहाराद्यपेक्षा वैदिके ज्ञाने इति न प्राणायामाद्युल्लेखः श्रुतिसूत्रयोः । लयविक्षेपादयश्च विघ्ना बलात्कारेण प्राणायामादिमतां निष्कर्मणां मिथ्याचाराणां कामक्रोधादिहतानामपक्वयोगिनां ध्यानप्रवृत्तानामेव स्वकल्पितनिरानन्दकूटस्थनिर्विशेषनिष्क्रियनिर्धर्मकात्माभासयत्किञ्चित्सेविनां प्रभवन्ति, अतो विश्वामित्रादयो योगभ्रष्टा एव दृश्यन्ते पुराणेतिहासादिषु न ज्ञानभ्रष्टाः । न च वेदान्तनयेन यथायथं यज्ञदानतपोऽध्ययनादिभिर्विनिधूतरागादिकानां विशुद्धसत्त्वानां शमदमादिमताम् श्रवणमननविनिर्द्धारितात्मस्वरूपाणां निरर्गलनिरन्तरध्यानैकनिष्ठानां निरतिशयानन्दमहार्णवप्रज्ञानघनब्रह्मात्मिमग्नचेतसां परमसौभाग्यसमृद्धानां महात्मनां पुरुषधौरेयाणां वेदान्तिनां छायामपि द्रष्टुं क्षमन्ते ते विघ्ना इतरे च देवादयः ; तथाच श्रुतिः "तस्य ह देवाश्च नाभूत्या ईशते" इतीति नोल्लेखो लयादेस्तत्प्रतीकाराणां च वेदान्ते ।

वेदान्ताश्च यज्ञदानतपोऽध्ययनादेरेव साधनत्वमाहुः, "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन" "शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यती"ति न्यायाश्च "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" "विहितत्वाच्चाश्रमकर्मापि" "सह-कारित्वेन च" "शमदमाद्युपेतः स्यात् तद्विधेस्तदङ्गतया तेषामप्यवश्यानुष्ठेयत्वात्" "सर्वान्नानुमतिश्च प्राणात्यये" इति । आह च याज्ञवल्क्यः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



"वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः।

श्रद्धोपवासः स्वातन्त्र्यमात्मनो ज्ञानहेतवः" ॥ इति

न चात्रापि सन्न्यासः प्राणायामादिर्वा प्रोक्तः। यानि चाङ्गानि श्रुति-सूत्रयोः कण्ठतः प्रोक्तानि तान्यारादुपकारकाणीति विदूरीकुर्वाणा येषां च नास्ति गन्धोऽपि वेदान्तेषु तानि चात्यादरेणाददाना आसनप्राणायामादीनि श्रद्दधाना कैश्चन च भौतिकैर्भाववैराकान् मोहयमानाः काषायं वासः परि-दधानाः सन्न्यासिवच्छिखासूत्रादिहीना एव मायावादिनो यथा कथञ्चित् वेदान्तान व्याचक्षाणा वयं वेदान्ताचार्या इत्यात्मानं निह्नुवाना वेदान्त-व्याख्याच्छद्मना बौद्धनयानेव व्याकुर्वाणा अवैदिकत्वात सांख्ययोग-नयानप्याश्रयमाणास्तैश्च वेदान्ततत्त्वान्यावृण्वाना नैव स्पृशन्ति वेदान्त-नयान मोक्षकरान सूत्रोपदर्शितान मुनिगणमान्याननवद्यानित्यहो वेद-प्रद्वेषः प्रच्छन्नबौद्धानाम्। सर्वथा सांख्यबौद्धतर्कजालैः वेदान्तोत्सादनमेवैषां कुलधर्मः।

नचास्मिन्नये मुक्तिर्जीवतः सम्भवति प्रारब्धक्षयादूर्ध्वमात्मनो मूर्द्धन्य-नाड्या देहादपायस्यैव मुक्तित्वं वक्ष्यते। अतः श्रुतावात्मरतिरात्म-क्रीड आत्ममिथुन आत्मानन्द इत्यादिरेवोक्तो ब्रह्मदर्शी न मुक्त इति। "विमुक्तश्च विमुच्यते" इति च हृदयस्थपरमात्मपर एव ज्ञेयः प्रकरणात्। अतो "गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति" "यज् ज्ञात्वा मुच्यते जन्तुर-मृतत्वं च गच्छति" "स एवं विद्वानस्माच्छरीरभेदादूर्ध्वमुत्क्रम्यामुष्मिन स्वर्गे लोके सर्वान कामानाप्त्वाऽमृतः समभव"दित्यादौ बद्धस्यैव जीवस्य मुक्तिरुक्ता न तु विमुक्तस्येति भाव्यम्।

अनिर्वाच्याऽविद्या बौद्धानां, जगन्मिथ्या बौद्धानां, रज्जुसर्प-शुक्ति-रूप्यादयो मिथ्या पदार्था बौद्धानां, व्यवहारिकी-तात्त्विकी-प्रातिभासिक्य-स्त्रिविधाः सत्ता बौद्धानां, मिथ्याऽविद्या च जगतः कारणं बौद्धानामत-स्तत्त्वज्ञानात् विश्वप्रलयो बौद्धानामेव। शब्दाद्यगोचरं सत्यज्ञानादिपद-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


लक्ष्यं परमार्थसत्यं विशुद्धं ब्रह्म च शून्यमेव बौद्धानां, तदुक्तं विवरणे "अमिथ्याभूतयोर्ब्रह्मशून्ययोरजन्मविनाशित्वादि" ति ।

कर्त्तृत्वादिशून्यः कूटस्थो निर्विशेष आत्मा सांख्यानां, गुणाश्च सत्त्वादयः सांख्यानाम्, अवच्छेदप्रतिबिम्बवादौ सांख्यानां, प्राणायामादयश्च सांख्यानामिति सर्वथाच्छादिता वेदान्ता अतो वेदान्तानां महान प्रलेपो मायावादः कल्पितः ।

सांख्यबौद्धनयोच्छिष्टं हन्त वेदान्तनामतः ।
स्वसिद्धान्तं वदन्त्यन्ये सन्तु सन्तो विवेकिनः ॥ इति ।

इति श्रीचारुकृष्णदर्शनाचार्यकृतौ वेदान्तविमर्शे प्रथमो भागः ।

---

# वेदान्तविमर्शः

## द्वितीयभागः

सुखमेव दुःखासंभिन्नं परमः पुमर्थो निरुपाधिकेष्टत्वात् । नच सुखं दुःखाभावश्च पुरुषार्थौ, सति सुखे दुःखाभावस्यावश्यम्भावित्वाल्लाघवात् सुखस्यैव तत्त्वम् । नच वैपरीत्यं सुषुप्तिप्रलययोर्व्यभिचारात् । धर्मार्थकाममोक्षाणां पुरुषार्थत्वप्रवादश्चायुर्घृतमितिवत् सुखसाधनत्वादौपचारिकः । तेषु मोक्षस्य प्राधान्यं च सत्येव मोक्षे तादृशसुखप्राप्तेर्मोक्षस्याविनाशित्वाच्च । ब्रह्मैव च तादृशं सुखं, "विज्ञानमानन्दं ब्रह्म" "आनन्दो ब्रह्मेति व्यजाना"दिति श्रुतिभ्याम्, "आनन्दमयोऽभ्यासादि"ति न्यायाच्च । तत्प्राप्तिश्च मुक्तौ, मुक्तिश्च ब्रह्मज्ञानात्, "ब्रह्म वेद ब्रह्मैव भवति" "ब्रह्मविदाप्नोति परम्" "यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति" "गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति" "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इति श्रुतिभ्यः मुक्तेश्चाविनाशित्वमावृत्तिराहित्यात्, यथाहुः श्रुतयः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



"ब्रह्मलोकमभिसंपद्यते न च पुनरावर्त्तते" "तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति न तेषां पुनरावृत्तिरि"त्याद्याः। मोक्षश्चात्मदर्शनात् पवित्रतमादखिलकर्मक्षयाज्जायते।

"यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति"

"क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"

"ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा"

"नहि ज्ञानेन सदृशं पवित्रमिह विद्यते।"

इति श्रुतिस्मृतिभ्यः। भवति चात्मदर्शनं साधनफलायातिशुद्धेन मनसैव, न चक्षुरादिभिः, "मनसैवानुद्रष्टव्यम्"

"दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः"।

"न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा।

ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः"॥

इति श्रुतिभ्यः। मनश्चास्मिन्नये नाप्यणु नापि विभु किन्तु मध्यमपरिमाणमुत्पन्नं ब्रह्मणः, "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" "स मनोऽसृजते"ति श्रुतिभ्याम्। "कामः सङ्कल्पो विचिकित्से"तिश्रुतेः कामादीनां मनोवृत्तित्वेऽप्यात्मसंलग्न एव मनस्युदयादात्मनस्तद्वत्त्वम्। कर्तृत्वं च चेतनत्वादात्मन एव कुलालवत् न मनसोऽचेतनत्वात् मृत्तिकावत्, "यो वेदेदं जिघ्राणीति स आत्मा यो वेदेदं मन्वानीति स आत्मा" "एष हि द्रष्टा स्प्रष्टा श्रोता घ्राते"ति श्रुतिभ्याम्। अतोऽहमिच्छाम्यहं जानाम्यहं बिभेमीत्यात्मसाक्षिकोऽबाधितप्रत्ययः सर्वेषाम्, वैदिकाश्च प्रयोगाः "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति" "स्वर्गकामो यजे।" "अग्निहोत्रं जुहोति" "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इति।

( क्रमशः )

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


9. **Introduction to the Rigveda** of Sayanacharya—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4. for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14; As. 10 (for member-

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahopadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramasnath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A. Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkaharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16 **Yatratattvam** of Raghunandana Bhāttacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakra, varti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof.Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members),

24. **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kali ada Tarkacharya, Rs, 5;Rs, 4-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# গ্রাহকগণের প্রতি অনুরোধ

বহুসদস্যের দেয় বার্ষিক চাঁদা দীর্ঘকাল বাকি পড়িয়া আছে। তাঁহারা তাহা পরিশোধের জন্য দয়া করিয়া পরিষৎ-সম্পাদকের সহিত পত্রালাপ করুণ। ইতি—

বিনীত—

পরিষৎ-সম্পাদক-সংঘ।

১৬৮।১, রাজা দীনেন্দ্র ষ্ট্রীট

শ্যামবাজার, কলিকাতা ৪

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXX.
No. 5
४०श-वर्षस्य
५म-संख्या

September 1957
१८७६शकाब्दे
भाद्रे
मासे

भारते भातु भारती

# संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थश्च

वार्षिकमूल्यम्—रूप्यकषट्कम् ६
Foreign price—1·4d

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# विज्ञापनम्

## विशेषतो द्रष्टव्यम्

संस्कृतसाहित्यपरिषदः चतुःषष्ट्यधिकत्रयोदशशततम-( १३६४ ) वङ्गाब्दीयं वार्षिकं मूल्यं ( Annual Subscription ) यैर्ग्राहकमहोदयैरेतावत्कालपर्यन्तं न परिशोधितं, तैः कृपया सत्वरं तत् प्रेषणीयम्। अन्यथा (V. P.) डाकयोगेन प्रेरणे व्ययाधिक्यं भविता। अतः परं यैस्तावदस्याः परिषदः सदस्यपदावस्थानं नेष्यते तैर्वेयं तूर्णं विज्ञापनीयाः। इति—

विनीत—संस्कृत-साहित्य-परिषत्-सम्पादकानाम्

१६८।१, राजा-दीनेन्द्रष्ट्रीट,

संस्कृतसाहित्यपरिषद्-भवनम्, कलिकाता—४

# Sanskrit Sahitya Parishat Series

**(Revised up to April, 1951)**

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhanta-bhushan. Re. 1-4 ; Re. 1. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshina-charan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kali pada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshina charan Bhattacharya. Rs. 2-8 ; out of stock.

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

(Cont. to Cover 3rd Page)

Printed by Bishnupada Bhattacharya M.A. Kabyatirtha. at Calcutta Oriental Press Private Ltd., 9, Panchanan Ghose Lane, Calcutta 9 and Published by the same from Sanskrit Sahitya Parishad, 168/1 Raja Dinendra Street, Shyambazar Calcutta,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

# संस्कृतसाहित्यपरिषत्

Vol. XXXX. No. 5 | १८७९-शकीये भाद्रे ४०श-वर्षस्य ५म-संख्या | September 1957.

## मतिमञ्जरी

### स्वाधीनता-शतवार्षिकी

[ निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः ]

को वा स्म जानाति यद् वर्षशतात प्राक् सिपाहीसैनिकानां विद्रोहाभ्यन्तरे स्वाधीनताया वीजमुप्तमासीत् । को वा स्वप्नेऽप्यज्ञानात क्षुदिरामप्रमुखा देशप्रेमिका मातृभूमिबन्धनमोचनार्थं कृतप्रयत्नाः प्राणदण्डादेशमपि सहास्यास्येन वृण्वानाः कदाचिद् देशवासिनां स्मृतिपथं सगौरवं समारोक्ष्यन्तीत्यहो महाकवेः प्रयोगसार्थक्यं "कालो ह्ययं निरवधिर्विपुला च पृथ्वी"ति वाक्यस्य। अद्यत्वे ते शहीदाख्यया गौरवभाजः संवृत्ता इत्यत्र किमु वा चित्रम् ! अपि च जन्मान्तरस्वीकर्तृणामस्माकं मते त एव "यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय ! सदा तद्भावभावितः" ॥ इति स्मृतिनयेन च पुनर्जन्म लभमाना भारतावनिसमुद्धरणार्थं समनुष्ठितव्यापारविशेषाः केचनाधुनापि जीविता वर्तन्ते—केचन वा गतायुषः । स्पष्टमिदं यत तेषां तेषां देशप्रेमवतां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



तदानीमपि वैदेशिकशासनावसानमभिप्रेतमासीदिति। तदिदमुप्तं बीजं सहकारिसम्पल्लाभेनाङ्कुरोद्गमादिक्रमेण पल्लवितं पुष्पितञ्च। दार्शनिकानां मिथ्याभूतमपि स्वाप्नं सत्यं ज्ञानम्। हर्षसम्पादकात् सुपुष्पितात् तस्माद् वृक्षात् खण्डीकृतं विषमयं स्वाधीनताफलं लब्धम्—यत्फलसेवनेन सुस्था अपि नागरिका नितरामुद्वेगजनिकां पीडामनुभवन्ति, दुर्दशायाः परां काष्ठाञ्चाधिगम्य लोकान्तरं प्रयान्ति। तदिदमनभिप्रेतमपि फलमवश्य-मस्माभिर्भोक्तव्यमिति विषादस्थानं चरमम्। तदानीं लोकक्षयनिवारणाय या खण्डीकृता स्वाधीनताभिप्रेतासीत् सेदानीं ततोऽपि बहुगुणितं लोक-क्षयं सम्पादयति। अपि च भारतवर्षस्य प्राचीनं रूपं शिष्टता शान्तिप्रियता लोकहितैषणेत्यादि देशान्तराद् भारतस्य यद् यद् वैशिष्ट्यमासीत् तत् सर्वमेकपदे विनष्टम्। भारतवर्षं न केवलभोगप्रधानं देशान्तरं भवितुमर्हति अथच धुरन्धराणां तत्रैव प्रयासः—एवं विचित्ररूपमिदं भारतवर्षं सर्वदा सर्वथा दुःखसहस्रमनुभूय शान्तिमार्गात् परिभ्रश्यति। नेतृभिर्विश्व-संयोगरक्षणायान्तर्जातिकमर्य्यादापरिपालनाय च यद्यदनुष्ठीयते तत् सर्वं प्रशंसार्हं किन्तु तत्र भारतीयवैशिष्ट्यचिह्नमवश्यं प्रदातव्यम्। अन्यथा कदाचिदपि शान्तिर्न प्रतिष्ठिता भविष्यति स्वराष्ट्रे परराष्ट्रे वा। भारतवर्षं नाम यत्र धर्मानुसरणेन राज्यं परिपाल्यते—यत्र सत्यस्य मर्य्यादारक्षणार्थं पत्न्यादयोऽपि परित्यज्यन्ते, यत्रैहिकभोगमवधूय परोपकृतये प्रजारञ्जनार्थञ्च भूपतिभिरपि छद्मवेशेन नगरान्नगरं ग्रामाद् ग्रामः पर्य्यट्यते। यत्र मन्वादीनामनुशासनं परिपूज्यते। अपीदानीं संवृत्तं तादृशं भारतवर्षम्? नवीनभावधारया सह संयोगो नास्माक-मनभिप्रेतः किन्तु मूलीभूतानां भारतीयवैशिष्ट्यानां संरक्षणपूर्वकं नवीन-वैशिष्ट्यस्य सम्मेलनं विधेयम्। तदपि न दुष्करम्। प्राचीनेऽपि भारते आपत्कल्पीयमनुशासनं पृथगासीत्। सर्वं कृत्यजातं धर्म्यभावजल-धारया क्षालनीयमिति मर्मार्थः। एवमनुष्ठिते बिधानप्रणयनद्वारा दण्ड-भीतिप्रदर्शनद्वारा वा दुर्नयरोधस्यावश्यकता नैव भविष्यति सर्वं शास्त्र-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



निर्दिष्टपथेन परिचालिता मनुष्यत्वसम्पन्नाः स्वं स्वं कर्तव्यं पालयिष्यन्ति, एषापि परिकल्पना झटित्येव न फलदायिनी भविता। इदानीमीदृशेऽनुष्ठिते ऽभ्यासबलेन बहोः कालात् परमन्ततो भारते कर्तव्यबुद्धिः शान्तिश्च प्रत्यावर्तिष्यते। अन्यथा युगसहस्रेणाप्येवंक्रमेण जगति भारते वा शान्तिर्न प्रतिष्ठिता भवितेति तत्त्वम्। तस्यायमवसरश्चिन्तनस्य नोपेक्षा-दृष्टिदृश्योऽयं प्रस्ताव इति प्राप्तशासनभारैः सुधीभिर्विचार्य्यतां यथैतदरण्य-रुदितं न स्यादिति।

---

# स्वातन्त्र्य-सन्धिक्षणम्

[ निबन्धकः—श्रीश्रीजीवन्यायतीर्थः, एम.ए. ]

( पूर्वानुवृत्तम् )

यतिवर्यः। अहमेव शुश्रूषे मातरम्। (इति मातृशुश्रूषां नाटयति)

नव्याः। (स्वगतम्) स्वातन्त्र्यलाभाय नास्त्युपायान्तरम्। ( प्रकाशम् ) अखण्डिता खण्डिता वा, सज्ञाना लुप्तज्ञाना वा, भारतभूमाता स्वातन्त्र्यमनुभवतु।

यति०। अखण्ड्या माता मे हिमगिरिकिरीटाब्धिचरणा
ससिन्धुर्वङ्गान्ता सितवसननीराञ्चलधरा।
प्रतिग्रामक्षेत्रं प्रतिजनपदं च प्रतिनदं
पवित्रा तीर्थश्रीघननिचितकाया विजयते॥
खण्डितायाः स्वातन्त्र्यं नाङ्गीकरणीयमिति मदीयं मतम्।

माह०। पाकिट्ठाणं पाकिट्ठानं देहि, अण्णधा पुणोवि जुद्धं भवे
(पाकिस्थानं पाकिस्थानं देहि, अन्यथा पुनरपि युद्धं भवेत्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यति० । (स्वगतम्) अभारतीयानां यवनानां मातुरङ्गच्छेदे नास्ति लेशतोऽपि दुःखम् । (प्रकाशम्) यदि कश्चित् पारतन्त्र्यविमुक्तम् अखण्ड-भारतं नेच्छति, स भारतवर्षाद् वहिर्गच्छतु ।

माह० । (स्वगतम) दुव्वअणरूक्खो दुप्पेक्खो अअं साहू । विलम्बे कज्जहाणी आसंकीअदि । (प्रकाशम्) तुलिदं तुलिदं ।

(स्वगतम्) दुर्वचनरूक्षः दुष्प्रेक्षोऽयं साधुः । विलम्बे कार्यहानिराशङ्क्यते । (प्रकाशम्) त्वरितं त्वरितम् ।

(आङ्गलप्रतिनिधिर्नव्यानां कर्णे एवमेवम् )

नव्याः । यतिवर्य ! यतीनामविषयो नाम राजनैतिकः प्रसङ्गः । तद् भवान् प्रतिनिवर्त्तताम् ! इयञ्च सोन्मादा महिला सर्वथानवधेयवचना ।

यति० । अखण्डभारतपरिक्रमो हि यतिधर्मः । यतिधर्मं वाधमाना राजनीतिरपि गृहस्थानामनुपास्या । स्वीकृतेऽपि पाकिस्थाने कथं नाम युद्धविरामः सम्भाव्येत ? यदि न रक्षितः स्यात् स तत्र भवादृशां का चिन्ता ।

नव्याः । युद्धविषये वयमेव प्रतिभुवः । यतिधर्मः परित्यज्यताम् । का हानिः ? भो आङ्गलप्रतिनिधे ! भवतैव क्रियतां विवादनिवृतिः ।

आं० प्र० । श्रूयतां भोः नव्याः

त्रिधा विभाज्यं किल भारताङ्गं माहम्मदाः खण्डयुगं लभन्ताम् ।
एकं महाखण्डमथ स्वतन्त्रं कृत्वा स्वयं शासनमारभध्वम् ॥

माह० । जेदु जेदु पाकिट्ठाणं । परितुट्ठोह्मि । (निष्क्रान्तः)

नव्याः । तथैवास्ताम् ।

प्रा० सं । हा हतास्मि ।

यति० । न तावत्तथा भवितुमर्हति । वयमस्य प्रतिवादिनः ।
अपिच स्वतन्त्रे भारते गोवधः सर्वथा प्रतिषेद्धव्यः ।

नव्याः । स्वतन्त्रे भारते सर्वविधिनिषेधेषु वयमेव प्रभवामो न भवन्तः । परन्तु वध्नीमो वयमस्मत्कार्यप्रतिवादिनं भवन्तं भवादृशञ्च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यति० । वध्यतां तुच्छशरीर एषः ।

आं० प्र० । (सङ्केतं कृत्वा) इदानीं गच्छाम्यहमात्मव्यापाराय ।
(जनान्तिकम्) इमे ब्राह्मणा सन्न्यासिनः प्राच्यसंस्कृतिश्च पाश्चात्त्य-
विद्वेषं कृत्वा चिरं स्थिताः ।

नव्याः । इदानीं भारतं स्वगणहस्ते दत्तमित्यनुभवन्तु भवन्तः । तथापि
भवद्गुणमनुवर्त्तामहे भवतां साहायकं च सर्वदा वाञ्छामः ।

आ० प्र० । तथा भविष्यति । धन्यवादाः (करमर्दनं नाटयन् निष्क्रान्तः)

रणेशः । (वंशीध्वनिं कुरुते, नगरपालः प्रविशति ) नगरपाल ! वध्यता-
मयं सन्न्यासी । नीयताञ्च कारागृहम् । प्राच्यसंस्कृते ! त्वयापि
पृथक्कारभवनमाश्रयणीयम् ।

नगरपालः । कथं सन्न्यासी नारी च स्वाधीने भारते बन्धनमर्हति ।
तथापि प्रभोर्निदेशः । (नमस्कृत्य) महाराज ! कारागृहं गच्छतु
भवान् ।

यति० । कथं वक्तुं कुण्ठितोऽसि ?

यत्राभवद् भगवतः पुरुषोत्तमस्य
जन्मग्रहो भरतभूभरलाघवाय ।
कंसादिदुर्जनगणस्य च शासनाय
कारागृहं तदिह मेऽस्तु तपोनिकेतः ॥

प्रा० स० । भो भ्रातरः ! बन्धनागारं वा वधदण्डं वा निरूपयथ
मदर्थम् । परन्त्वयं साधुर्न बन्धनदशामर्हति ।

नगरपालः । महिले ! निर्व्याजमग्रेसरी भव कारागृहं प्रति । अलमरण्य-
रुदितप्रायेणोपदेशदानेन ।

यति० । मातः प्रसीद भरतावनि ! सूनुवर्ग-
स्वर्गापवर्गसरणि ! स्मरणीयरूपे !
बद्धस्त्वदङ्गजरजः शिरसा दधान-
स्त्वामाशरीरपतनादहमप्युपासे ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नगरपालः। साधो! कथं विलम्ब्यते ? कारागृहमधिष्ठाय निश्चिन्तेन
भवता भगवदुपासनैव क्रियताम्

दुर्भिक्षादयः। हा हा! मधुरविलासः

स्वाधीनः स्याद् भुवि चिरदासः।
श्वेतप्रभुगणमहिमा जयति
प्रतिहतबाधा विलसति नियतिः
पूरित इव नः कियदभिलाषः॥
जननीकर्त्तनमनु नवनर्त्तन—
माहम्मदगणचित्तम्
भारतखण्डे युद्धमकाण्डे
कुरुते ततकृतकृत्यम्।
वयमपि धन्या विस्मृतदैन्या,
आशास्यत इह सुस्थिरवासः॥

यति०। धन्योऽसि भो नगरपाल! विधाय बन्धो!

बन्धालये मम तपोनियमानुबन्धम्।
सन्न्यासिना वसनवासविवर्जितस्य
कारागृहं तरुतलं च वनञ्च तुल्यम्।

प्रा० सं०। यतिराट्! दीयन्तामाशिषो यथात्मविस्मृता न स्याम्।

यति०। निर्विघ्नं तवापि तपो वर्द्धताम्। महानयं शुभावसरः।

किमतः परमपि प्रियमस्ति ? तथापीदमस्तु,
स्वातन्त्र्यसम्भृतधराभृत आत्मधर्मं
प्रेम्णा भजन्तु भगवन्महिमावदातम्॥
विश्वैकमङ्गलमयी ननु जीवचित्ते
सद्भावना विलसतु श्रियमेतु लोकः॥

इति श्रीश्रीजीवन्यायतीर्थविरचितं स्वातन्त्र्यसन्धिक्षणं
नाम प्रहसनं समाप्तम्।

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# योगिभक्तचरितम्

( काव्यम् )

(निबन्धकः—श्रीकाश्यपकविः)

महामहिम्ने पुरुषोत्तमाय क्षेमाय धर्मस्थितिकारणाय ।
लीलाशरीरेण भुवं श्रिताय तस्मै नमः पातकशातनाय ॥१

यदा यदा ग्लानिरिह प्रभूता धर्मस्य पापाभ्युदयेन लोके ।
सतामसद्भिश्च नया निरस्ता-स्तदा शरीरं वृणुते परेशः ॥२

स तेन लीलावपुषा महीयान दृप्तं दुराचारगणं विनाश्य ।
पापप्रभावं परिभूय भूयः करोति धर्मस्य भुवि प्रतिष्ठाम ॥३

अनुत्कटे वा वितते विकारे वसुन्धरायां सुकृतस्य सोऽयम् ।
सम्प्रेष्य कञ्चिन्निजभक्तराजं तेनैव निष्पादयति स्वकृत्यम ॥४

हिरण्यपूर्वः कशिपुः कदाचिद् यदामरेशानधरीचकार ।
स्वतेजसा सत्त्वगुणेन हीनः सुरद्विजानामभवत् सपत्नः ॥५

प्रह्लादमाह्लादकरं समेषां शीले विशुद्धं हरिभक्तराजम् ।
स्वपुत्रमप्यत्रपमुद्धतात्मा निपातयामास विपत्प्रताने ॥६

हुताशमातङ्गसमुद्रमुख्यैरुपायजालैरिह तत्प्रयुक्तैः ।
तज्जीवनं संशयितं तदाभूत न बाधयासौ विनिवृत्तिमापत ॥७

न श्रीहरेर्नाम स जातु सेहे हिरण्यपूर्वः कशिपुः सुदृप्तः ।
तस्मिन् सुराधीशपदाधिरूढे प्रकाशमासीन्नहि देवपूजा ॥८

मर्त्या इवार्त्तास्त्रिदशाः समस्ताः पराजितास्तेन विलुप्तिमापुः ।
धर्मस्वरूपं सुतरां विशीर्णं पापस्य मूर्तिः प्रबभूव दीप्ता ॥९

एवं स्थितायां जगतो दशायां भक्तानुरक्तः परमेश्वरात्मा ।
धृत्वा विचित्रं नरसिंहरूपं जघान तं दैत्यमपत्यशत्रुम् ॥१०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



निशाचराधीश्वररावणाद्यास्तथा यदाकुर्वत धर्मवैरम् ।
श्रीरामरूपेण तदावतीर्णो धर्मस्थितिं साधयति स्म देवः ॥११
तथा तृतीयेऽपि युगे धरायां कंसादिभिर्यावदहिंसि धर्मः ।
तावत् स जातो वसुदेवगेहे धर्मं दधौ दुष्टगणस्य हन्ता ॥१२
विभूतियुक्तानपि च स्वभक्तान् अनेककृत्वः सुकृतस्य भूत्यै ।
सम्प्रेषयामास परेश्वरोऽसौ धर्मस्थितिं साधयितुं धरायाम् ॥१३
तत्प्रेषितास्ते वसुधामुपेत्य स्वानुष्ठिताचारचयप्रचारैः ।
दुर्वृत्तचित्तानि सुदुर्गतानि सञ्चारयामासुरुदात्तमार्गं ॥१४
ईशप्रसादो यदि नाभविष्यत तथा धरायां बहुधा प्रकीर्णः ।
तदाद्य धर्मस्य कथापि लोके नाश्रोष्यतानन्तविरोधिसृष्टेः ॥१५
धर्मानुगानां किल बाहुजानां यदात्र भूमौ प्रथितोऽधिकारः ।
तदैहिकामुष्मिकदण्डभीत्या स्थित्यापि वृद्धिं प्रजगाम धर्मः ॥१६
अथो क्वचिद् भूरिगुणप्रचारैः प्रवाति लोकायतिके समीरे ।
केषाञ्चिदास्था विननाश धर्मे राज्ञो भयं तावदधात् समाजम् ॥१७
ततः परस्तादपि हिन्दुधर्मि राज्याधिकारे वितते पृथिव्याम् ।
सनातनो नास्तमवाप धर्मो धर्मान्तरं तं न परं ववाधे ॥१८
किन्तु प्रपन्ने समये परस्तान् माहम्मदानां विपुलाधिकारे ।
माहम्मदाः केचन भूमिनाथा न सेहिरे धर्ममतं परेषाम् ॥१९
ते शस्त्रभीतिं परिदर्श्य लोकान् निन्युः स्वधर्मं परितो बलेन ।
उदारसत्त्वाः किल कंचिदन्ये ववाधिरे ना सुकृतं समक्षम् ॥२०
तत्रापि काले भुवि हिन्दुधर्मस्तथा न लेभे सुतरां विलोपम् ।
सनातनाख्यां सफलां दधानस्तदापि रेजे स नृणां समाजे ॥२१
अतः परं म्लेच्छनृपाधिकारे सौभाग्ययोगेन युरोपभूमेः ।
प्राप्तप्रचारः किल खृष्टधर्मो धर्मान्तरस्यातिरिपुर्बभूव ॥२२

( क्रमशः )

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# सोवियद्भूमिपुत्रः संस्कृतप्रणयी कल्याणमित्रः

[ लेखिका—श्रीमती कमला रत्नम् ]

(मास्को—भारतीयराजदूतावासतः) एम. ए, टि, डि, (लण्डन)

"सोवियद्भूम्यां रुसक्रान्त्योपरान्तं (?) सर्वं प्राचीनमुच्छेदितम्"; यथार्थवादिन्यस्मिन्देशे ईश्वरविश्वासप्राचीनधर्मेतिहासानां लेशमात्रमपि नावशिष्टमित्यादयो बहवो जनप्रवादा अत्रागमनात्पूर्वं जनैः श्रूयन्ते। वस्तुस्थितिस्तु न तथा। इतिहासादीनां प्राचीनविद्यानां सम्यगध्ययनं, दर्शनकलाविज्ञानसाहित्यानां सम्यगनुशीलनं चास्यां मार्क्सवादस्य प्रयोगशालायां भूमौ रूपान्तरेणावशिष्यत एव। उदाहरणार्थमत्र संस्कृतभाषाया अध्ययनस्य गतिविधिं ज्ञातुमिच्छती अहं कल्याणोवित्युपनामानं लेनिनग्रादविश्वविद्यालये आचार्यपदस्थं कमपि महानुभावं समगच्छम्।

शैशवाद्धि एतस्य महानुभावस्य रुचिर्भाषाशास्त्रेऽस्ति, अत एवानेन प्राचीनतमसंस्कृतभाषाया अप्यध्ययनं कृतम्। लेनिनग्रादनगरं गत्वा तत्कालीनविश्रुताचार्यात् श्चेरबात्स्कोकीनामधेयादनेन संस्कृतसाहित्यस्य व्याकरणस्य चाध्ययनं कृतम्। कालिदासग्रन्थानां विशेषतः मेघदूतस्यावलोकनं रसास्वादनं च कृतम्। संस्कृतसाहित्येऽस्य गाढां प्रीतिं दृष्ट्वा श्चेरबात्स्कोकीगुरुणास्मै कल्याणमित्र इति नामधेयमपि दत्तम्।

कौटिल्यप्रणीतस्यार्थशास्त्रस्याध्ययनं समालोचनं च कल्याणमित्रस्य प्रमुखकार्यमस्ति। नातिकालेन अस्यैषा कृतिः प्रकाशिता भवति। अनेन महाभारतस्य नामास्माकं प्राचीनतरस्य महाकाव्यस्याप्यध्ययनं कृतम्। स च गतवर्षे एतत्पुरातनग्रन्थस्यानुवादोऽप्यनेन रूसीयभाषया कृतः। स च



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रकाशितोऽपि वर्तते। तावदादिपर्वण एवानुवादः समाप्तिं गतः अधुना कल्याणमित्रः सभापर्वणोऽनुवादकार्ये संलग्नः। नूनमेतत्कार्यं समयमपेक्षते कतिपयविशिष्टविदुषां साहाय्यं च। एतत्सर्वं कल्याणमित्रादुपलब्धमस्ति।

कालान्तरेण विदेशस्थविदुषां कार्यपरिचयार्थं कल्याणमित्रो देशदेशान्तरमपि पर्यटति। तत्र साहित्यपरिषत्सु विद्वद्गोष्ठीषु च सम्मानितमासनमलङ्करोति। भाग्येनास्मै सहृदयता, कवित्वशक्तिः अपि च तद्वरञ्जनार्थं प्रतिभाशालिनी ललितपदावली अपि दत्ताः। प्रायेणान्तरराष्ट्रियगोष्ठीष्वयं स्वरचितान श्लोकान पठति। नातिकालपूर्वं कतिपयसोवियद्विद्वद्भिः सार्धं कल्याणमित्रो भारतवर्षमगच्छत। भारतं प्रत्येषास्य द्वितीया यात्रासीत्। एतद्विद्वन्मण्डलस्य नेतृत्वं स्वयं सोवियत संघस्य शिक्षामन्त्रिणा कृतम्! पर्यटनानन्तरं भारतवर्षात्पुनस्स्वभूमिं प्रत्यागतवती एषा शिष्टमण्डली मस्कोनगरे वाकसनाम्न्या विदेशैः सांस्कृतिकसम्बन्धकारिण्या सोवियत्संस्थया समाहूता। यथापूर्वमस्मिन् समारोहेऽपि कल्याणमित्रेण केचित् स्वीयाः स्मृतिश्लोकाः पठिताः। तानहं पाठकानां मनोविनोदार्थं नीचैरुद्धरामि :—

मैत्राद् भारतवर्षस्य सोऽव्यद्भूमेस्तथोत्सवम्।
अत्र सम्यक् पूजयितुं वयं सर्वे समागताः ॥१॥
शुभं प्रवर्तमानेऽत्र तत्र पुण्ये महोत्सवे।
सत्कारो विपुलो हार्दः सौहार्दाद् विहितो हि नः ॥२॥
सर्वभारतखण्डस्य कृतज्ञात्मा स्मराम्यहं
मुदा परमयेदानीं हृदयं पूर्यते मम ॥३॥
पौराणे सुन्दरे राष्ट्रे भ्रमन्तो मुदिता वयम्
बहून्देशान्दृष्टवन्तश्चारुप्रकृतिविस्मिताः ॥४॥
दृष्टपूर्वो न चास्माभिस्तथा देशो हि कश्चन
देशश्चाविस्मरश्चित्रः स्मृतिषु नः सुरक्षितः ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कल्कत्तानगरीं गत्वा विमानेन विहायसा
तांस्तान्विषयांश्च दृष्ट्वा पाटलिपुत्रमागताः ॥६॥
मौर्यश्रीचन्द्रगुप्तस्य राजधानी पुरा यतः ।
अर्थशास्त्रं पुरा यत्र कौटिल्येन विनिर्मितम् ॥७॥
काशीपुरीं ततः पश्चात् पुण्यगङ्गासुशोभिताम्
दृष्ट्वा न समयाभावाद् दृष्टं लक्ष्मणपत्तनम् ॥८॥
इन्द्रप्रस्थं सुविख्यातं वयश्चाभिगतास्ततः
वर्तमानां राजधानीं स्वाधीनभारतस्य वै ॥९॥
यत्पुरासीद्राजधानी पाण्डवानां महात्मनाम्
ततो वयं दृष्टवन्तो मुम्बयीपुरमुत्तमम् ॥१०॥
समुद्रतीरविन्यस्तं चित्रहर्म्यविभूषितम्
अजन्तैलोरमन्दिरान्वितं विस्मयकारणम् ॥११॥
इतो गता वयं शीघ्रं बंगलोरपुरं प्रति
यत्र प्रियाः शीतवाता नित्यं राजन्ति दाक्षिणाः ॥१२॥
ततो वयं दृष्टवन्तो महिषासुरपत्तनं
सुवर्णनगरीनाम्ना विश्रुतं भारतान्तरे ॥१३॥
ततो मद्रासनगरं स्नाता यत्र महार्णवे
प्राप्योत्तरां दिशं पश्चान्नगरीमागरां गताः ॥१४॥
ताजमहलशोभाढ्यां दृष्टवान् यत्र मां कपिः
इन्द्रप्रस्थं पुनर्गत्वा सुहृद्भिः सत्कृता वयम् ॥१५॥
समादृताः पूजिताश्च मित्रैरनुमता वयम्
आपृच्छ्य सुहृदः सर्वान्मातृभूमिं पुनर्गताः ॥१६॥

इमे बङ्गलोरदर्शनकाले संस्कृतमहापण्डितानां समागमे कल्याणमित्रेण विरचिताः कतिचित् श्लोकाः—

बहुराष्ट्राण्यतिक्रम्य विमानेन विहायसा
भवतां सुन्दरीं भूमिं पौराणीं वयमागताः ॥१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



परस्परं स्नेहहृष्टेनाऽखिलेनान्तरात्मना
युष्मानद्य नमस्यामः स्निग्धानस्मत्सुहृज्जनान् ॥२॥
अस्मद्भूम्योः पूर्वकालादासीन्मैत्र्यं सनातनम्
एतद्विवर्धनार्थं च वयं सर्वे यतामहे ॥३॥
मैत्र्यं चेदमविच्छेद्यं प्रजानामावयोर्महत
सर्वत्र जनताभूत्यै जीवताच्छाश्वतीः समाः ॥४॥

अयं च श्लोको मद्रपुरस्थायै महानट्यै श्रीमत्यै परमेश्वरीत्युपनाम्न्यै सुलोचनायै तन्नृत्यकलामोहितेन कल्याणमित्रेण निवेदितः—

महानटीं विशालाक्षीं श्रियं मूर्त्तां सुलोचनाम्
संवर्द्धयाम्यहं स्नेहाद् गुणेनास्या विमोहितः ॥१॥

---

# वेदान्तविमर्शः

## ( द्वितीयभागः )

[ निबन्धकः—श्रीचारुकृष्णदर्शनाचार्यः ]

( पूर्वानुवृत्तः )

सूपपन्ना इतरथा मिथ्यैव स्युः। वैदिकनये चात्मन एव कर्त्तृत्वात् "कर्त्ता शास्त्रार्थवत्त्वादि"ति सूत्रे चात्मनः कर्त्तृत्वं परीक्षितमेव। अयोदहतीतिवदारोपितत्वे सूत्रकार एव तदवक्ष्यत, कर्त्तृत्वस्य च मिथ्यात्वात् तत्प्रतिषेधेनाकर्त्तृत्वमेव सम्यगित्यप्यवक्ष्यत्, यथा सेनानीर्न युद्धस्य कर्त्ता किन्तु राजैवेति।

कर्त्तापि जीवोऽकर्त्ता च भवति यथा तक्षा स्वबुद्धिपाण्यादिप्रचेष्टाभिः खट्वादीनां प्रत्यक्षः कर्त्ताप्यकर्त्ता भवति तद्वदिति द्वयमेव सत्यम्। ननु तक्ष्णः स्वाम्यधीनत्वेनास्वातन्त्र्याद् युज्यतेऽकर्त्तृत्वं कर्त्तुरपि "स्वतन्त्रः कर्त्ते"त्यनु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



शासनात्, जीवस्य तु स्वतन्त्रस्य कर्त्तृत्वमेव स्यादकर्त्तृत्वं कुत इति चेत् ? कथ्यते, परमेश्वराधीनमेव तस्य कर्त्तृत्वं सर्व्वत्र, न स्वातन्त्र्यं कुत्रापि, दृश्यते च बहुप्रयासोद्यमेच्छाभिरप्यारब्धं विहन्यते, नैवं स्वातन्त्र्ये, तथाच श्रुतिः "एष एव साधु कर्म्म कारयति तं यमेभ्य उन्निनीषते एष एवासाधु कर्म्म कारयति तं यमेभ्योऽधोनिनीषते", इति। एवञ्चेतरापेक्षया स्वातन्त्र्यात् कर्त्तृत्वमीश्वरापेक्षया चास्वातन्त्र्यादकर्त्तृत्वं जीवस्येति बोध्यम्। तदिदं पारमर्षसूत्रद्वयं "यथा च तक्षोभयथा" "परात्तु तच्छ्रुतेरि"ति। नचौपाधिकं कर्त्तृत्वं जीवस्य स्वतस्तु कर्त्तृत्वमिति वाच्यं प्रमाणाभावात्, कर्त्तृत्वशक्तिमत्त्वाच्च कर्त्तृत्वमन्यथा शतशोऽपि प्रयत्नैर्न स्यादिति।

न च स्फटिके कुसुमलौहित्यवत् बुद्धिवृत्तिकर्त्तृत्वमात्मन्युपहितं 'कर्त्ता शास्त्रार्थवत्त्वादि'तिसूत्रे बुद्धेः कर्त्तृत्वनिरासेनात्मन एव कर्त्तृत्वस्य साधितत्वात्। न च कर्त्तृत्वमाध्यासिकमुक्तं सूत्रकृता, तथा सति च श्रुतयो मिथ्यावादिन्यः स्युः। नचाविद्यावद्विषयाणि शास्त्राणि श्रुतिसूत्रयोरनुक्तत्वात्। तथाहि "दंशो वा मशको वा यद्यद् भवन्ति तदा भवन्ती"ति सुषुप्तिश्रुतेः, "अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवदि"ति सूत्राच्च ब्रह्मांशस्यापि जीवस्य ब्राह्मणादितत्तज्जातित्वम्। यथातिस्वच्छोऽपि ज्वलनः शवं प्रदहन् सर्व्वथा त्याज्यः श्रौते स्मार्त्ते च कार्य्ये, ग्राह्यश्च श्रोत्रियसद्मस्थो मन्त्रसंस्कृतोऽरणिसम्भवः स एव, तथा स्वतः शुद्धोऽपि जीवो ब्राह्मणशूद्रादिदेहसम्बन्धादेव तत्तज्जातिः शुद्ध्यशुद्धिमान्। तथा चक्षुरादिभिर्दर्शनश्रवणादिकर्त्ता, मनसा च कामसङ्कल्पादिकर्त्ता, यजेत दद्यादित्यादिश्रुतेर्यागदानादिकर्त्ता च स एव। प्रियाप्रियसङ्गाच्चेतसः सुखदुःखवृत्तौ तत्सम्बन्धादहं सुखी दुःखी चेत्यनुभविता स एव, नचात्र किञ्चिन्मिथ्या, न चैषां मिथ्यात्वमुक्तं श्रुतिसूत्रयोः। न चा"सङ्गो ह्ययं पुरुष" इति श्रुतेरात्माऽसङ्ग एतस्याः स्वप्नपरत्वात् स्वप्ने च पुण्यपापानां विषयाणामभावादसङ्गत्वमुक्तं, तदुक्तम् "अनन्वागतः पुण्येन पापेने"ति,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नैवं जाग्रद्व्यवहारे श्रूयते। तस्मान्नाविद्यावद्विषयाणि प्रत्यक्षादिप्रमाणानि शास्त्राणि च। न च जीवोऽशनायाद्यतीतोऽपेतब्रह्मक्षत्रादिभेदोऽभिहितो वेदान्ते किन्तु परमात्मैव; "विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प" इति परमात्मन एव प्रकरणात्। "यत्रैतत पुरुषोऽशिशिषति" "यत्रैतत पुरुषः पिपासतो"ति जीवस्याशनायापिपासाश्रुतेश्च। अपहतपाप्मत्वादिकं च ब्रह्मण एव धर्म्मो न जीवस्य, "अन्तस्तद्धर्म्मोपदेशादि"ति सूत्रे तथैवोक्तत्वात्, "सोऽन्वेष्टव्यः स विजिज्ञासितव्य" इति कर्म्मत्वव्यपदेशाच्च, न च कर्म्मैव कर्त्ता भवति "भेदव्यपदेशात्" "कर्म्मकर्त्तृव्यपदेशादि"त्युक्तेरिति बोध्यम्। न च ब्रह्मैव जीवः परं तदंश एवेत्यसकृदावेदितम्। नच जीवस्य कर्त्तृत्वं स्वाभाविकमौपाधिकं वेति विचारार्थं सूत्रमिदं तथा सति औपाधिकमित्यसूत्रयिष्यत, कर्त्तृत्वस्यैव साध्यत्वात्, नच चेतनस्य कर्त्तृत्वं स्वभावात् परं प्रयोजनवशादेव। "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते"।

( क्रमशः )

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीलकृष्णदासकविराजगोस्वामिप्रणीत-

# श्रीचैतन्यचरितामृतस्य संस्कृतानुवादः

अनुवादकः—श्रीभास्करानन्दसरस्वतीस्वामी

## श्रीचैतन्यचरितामृते मध्यलीलायां

### प्रथमः परिच्छेदः

"यस्य प्रसादादज्ञोऽपि सद्यः सर्वज्ञतां व्रजेत् ।
स श्रीचैतन्यदेवो मे भगवान् सम्प्रसीदतु ॥१॥
वन्दे श्रीकृष्णचैतन्य-नित्यानन्दौ सहोदितौ ।
गौड़ोदये पुष्पवन्तौ चित्रौ शन्दौ तमोनुदौ ॥२॥
जयतां सुरतौ पङ्गोर्ममामन्दमतेर्गती ।
मत्सर्वस्व-पदाम्भोजौ राधा-मदनमोहनौ ॥३॥

दीव्यद्वृन्दारण्य-कल्पद्रुमाधः
श्रीमद्रत्नागार-सिंहासनस्थौ ।
श्रीमद्राधा-श्रीलगोविन्ददेवौ
प्रेष्ठालीभिः सेव्यमानौ स्मरामि ॥४॥

श्रीमान्रासरसारम्भी वंशीवटतटस्थितः ।
कर्षन् वेणुस्वनैर्गोपीर्गोपीनाथः श्रियेऽस्तु नः ॥५॥
जयताज्जयताद् गौरचन्द्रः कारुण्यसागरः ।
जेजीयतां शचीसूनुर्जयताद्दीनवत्सलः ॥
नित्यानन्दः प्रभुर्जीयाज्जीयादद्वैतचन्द्रमाः ।
श्रीवासाद्याश्च सर्वे श्रीगौरभक्ता जयन्त्विह ॥
सूत्रमेवादिलीलायास्तस्याः प्रोक्तं मया पुरः ।
श्रीवृन्दावनदासेन कथिता या सविस्तरम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अतएव मया सूत्रमात्रमुल्लिखितं पुनः ।
यः कश्चन विशेषोऽत्र कथितः सूत्र एव सः ॥
वक्ष्यन्ते शेषलीलाया मुख्यसूत्राणि साम्प्रतम् ।
प्रभोरशेषलीलानां सम्यग्व्याख्या न सम्भवेत् ॥
तासु लीलासु येऽप्यंशा ग्रन्थे चैतन्यमङ्गले ।
श्रीवृन्दावनदासेन वर्णिताः सन्ति विस्तृतम् ॥
संक्षिप्तान्येव सूत्राणि तेषामत्र लिखाम्यहम् ।
तत्र यो यो विशेषोऽस्ति मया सोऽत्र वितन्यते ॥
व्यासश्चैतन्यलीलायां दासो वृन्दावनः खलु ।
तस्याज्ञया तदुच्छिष्टमिदानीं चर्व्यते मया ॥
भक्त्या तच्चरणाम्भोजं शिरसा धारयन्नहम् ।
सूत्राणि शेषलीलाया वर्णयिष्यामि कानिचित् ॥
चतुर्विंशतिमब्दान् यां लीलां गेहमधिष्ठितः ।
प्रभुर्विहितवान्नाम्ना सादिलीलेति कथ्यते ॥१०॥
तच्चतुर्विंशवर्षान्ते माघमासे समागते ।
शुक्लपक्षे च सन्न्यासं कृतवान् श्रीमहाप्रभुः ॥
एवं गृहीतसन्न्यासश्चतुर्विंशतिमब्दकान् ।
प्रभुश्चकार यां लीलां शेषलीलेति नाम सा ॥
द्वे नाम्नी शेषलीलाया मध्या चान्त्या च भेदतः ।
नामभेदं ब्रुवन्त्येवं लीलाभेदेन वैष्णवाः ॥
गौड़े नीलाचले सेतुबन्धे वृन्दावने तथा ।
तेषु षड्वत्सरानास्तां गमनागमने प्रभोः ॥
तत्र तत्र च या लीला मध्यलीलेति सोच्यते ।
या लीला च ततः पश्चात् सान्त्यलीलाभिधीयते ॥

( क्रमशः )

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



9. **Introduction to the Rigveda** of Sayanacharya—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4 for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14; As. 10 (for member-

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahopadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramasnath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A. Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16 **Yatratattvam** of Raghunandana Bhāttacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakra, varti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof.Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members),

24. **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kali ada Tarkacharya, Rs, 5;Rs, 4-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# গ্রাহকগণের প্রতি অনুরোধ

বহুসদস্যের দেয় বার্ষিক চাঁদা দীর্ঘকাল বাকি পড়িয়া আছে। তাঁহারা তাহা পরিশোধের জন্য দয়া করিয়া পরিষৎ-সম্পাদকের সহিত পত্রালাপ করুণ। ইতি—

বিনীত—
পরিষৎ-সম্পাদক-সংঘ।
১৬৮।১, রাজা দীনেন্দ্র ষ্ট্রীট
শ্যামবাজার, কলিকাতা ৪

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXX. No. 7

४०श-वर्षस्य ७म-संख्या

Novemb

१८७६

कार्तिके मासे

# संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थश्च

वार्षिकमूल्यम्—रूप्यकषट्कम् ६।

Foreign price—1-4d

संस्कृत-साहित्य-परिषत्

श्यामबाजार, कलिकाता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# विज्ञापनम्

## विशेषतो द्रष्टव्यम्

संस्कृतसाहित्यपरिषदः चतुःषष्ट्यधिकत्रयोदशशततम-( १३६४ ) वङ्गाब्दीयं वार्षिकं मूल्यं ( Annual Subscription ) यैर्ग्राहकमहोदयैरेतावत्कालपर्यन्तं न परिशोधितं, तैः कृपया सत्वरं तत् प्रेषणीयम्। अन्यथा (V. P.) डाकयोगे प्रेरणे व्ययाधिक्यं भविता। अतः परं यैस्तावदस्याः परिषदः सदस्यतास्थानं नेष्यते तैर्वेयं तूर्णं विज्ञापनीयाः। इति—

विनीत—संस्कृत-साहित्य-परिषत्-सम्पादकानाम्

१६८।१, राजा-दीनेन्द्रष्ट्रीट्,

संस्कृतसाहित्यपरिषद्-भवनम्, कलिकाता—४

# Sanskrit Sahitya Parishat Series

**(Revised up to April, 1951)**

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (Out of stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1-4 ; Re. I. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshinacharan Bhattacharya. (Out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kali pada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshinacharan Bhattacharya. Rs. 2-8. (Out of stock.)

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

(Cont. to Cover 3rd Page)

Printed by Bishnupada Bhattacharya M.A. Kavyatirtha at Calcutta Oriental Press Private Ltd., 9, Panchanan Ghose Lane, Calcutta 9 and published by the same from Sanskrit Sahitya Parishad, 168/1, Raja Dinendra Street, Shyambazar, Calcutta-4,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

# संस्कृतसाहित्यपरिषत्

Vol. XXXX. No. 7 — १८७९-शकीये कार्तिके ४०श-वर्षस्य ७म-संख्या — November 1957.

## मतिमञ्जरी

### राष्ट्रभाषा

[ निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः ]

स्वाधीनतालाभादनन्तरं भारतवर्षस्य राष्ट्रभाषामधिकृत्य विवदन्ते नागरिका विपश्चितो नेतारश्च । वर्षदशके व्यतीतप्रायेऽपि कोऽपि निर्णयो न विहितः । अन्तराधिकारवलेन हिन्दीभाषा राष्ट्रभाषा भविता पञ्चदशवर्षात् परमधुनाङ्गलभाषैव स्थास्यतीत्युद्घोषितं राष्ट्रपरिचालकैः । प्रचलति च तदनुगुणं प्रचारकार्य्यमपि । तदानीमस्माभिरेतत् समालोचितं पत्रिकाखण्डान्तरेषु । इदानीं पञ्जाबादिप्रदेशेषु हिन्दीभाषाभाषिणामुदग्रं प्रयासं तथा तन्निराकरणाय राष्ट्रप्रधानानां चाञ्चल्यमभिलक्ष्य पुनरस्माभिः कस्या भारतीयभाषाया राष्ट्रभाषापदमर्य्यादालाभाधिकारो वर्त्तते तत् युक्त्या विविच्यते । एतन्निर्णयाय च निरपेक्षकाः समदर्शिनो विचारकुशला विद्वांसः समाहूयन्ते पत्रिकायामस्यां स्वाभिप्रेतदृढयुक्तिप्रदर्शनपूर्वकम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



'या भारतीयभाषा सर्वप्रदेशव्यापिका, शब्दसम्पदा नित्यं नवीनान् शब्दान् समुत्पादयितुं समर्था, यस्या भाषायाः शिक्षणार्थं प्रदेशविशेषस्य मुखापेक्षित्वं नास्ते, या स्थूलतः प्रादेशिकतागन्धवर्जिता, सैव भाषा न्यायतो भारतीयराष्ट्रभाषापदमर्य्यादामर्हतीत्यत्र कः सन्देहप्रसरः। निरपेक्षचिन्तया विचार्य्यास्माभिर्निःसङ्कोचमेवं वक्तुं शक्यते यदेकैव संस्कृतभाषा देवनागरलिपिसनाथा पदमिदमलङ्कर्तुं समर्था। नान्या भाषा। भारतस्य यद् यद् वैशिष्ट्यं, यद् यदनन्यसाधारणत्वं, यद् यत शिक्षणीयं, यद् यद् रत्नभूतं तत्सर्वमस्यामेव भाषायामुपनिबद्धं देदीप्यते। मृतभाषात्वेनोपेक्षितापि वैदेशिकैर्या प्रत्यहमजस्रं नवनवशब्दसुतं प्रसूय वैदेशिकानां तदनुयायिनाञ्च वाक्य वितथयति। युज्यतेऽधुना निर्भयमुद्घोषणं तस्याः संस्कृतभाषाया राष्ट्रभाषात्वस्य। लिपिज्ञानसम्पन्नानां शिक्षितकोटौ गणनेन यदि षोड़शसप्तदशसंख्यकाः प्रतिशतं शिक्षितास्तेषु कति नामाङ्गलभाषां जानन्ति, तत्र यद्येतावत्कालमाङ्गलभाषया राष्ट्रकार्य्यं सुष्ठु परिचालितं तर्हि ततोऽधिकसंस्कृतबोधकुशलैः कथं तद् राष्ट्रकार्य्यं निर्वाहितं न भविष्यति तच्चिन्तयितुमपि न शक्नुमः। मज्जगता संस्कृतभाषा भारतीयानां जन्मनः प्रभृति मृत्युपर्य्यन्तं प्रातरारभ्य शयनपर्य्यन्तं नानाविधैर्व्यवहारैरनुष्ठानैश्च। संस्कृतभाषा व्याकरणयन्त्रिता दुर्बोध्या प्रयोगक्लेशावहेति चेन्न तथात्वं किमाङ्गलभाषायामपि नास्ते ; प्रमाणत्वेन परीक्षासु संस्कृतभाषायामनुत्तीर्णसंख्यात आङ्गलभाषायामनुत्तीर्णानां संख्या समधिका नवेति विचार्य्यतयोपन्यस्यते। वैदेशिकशासनकाले गतानुगतिकया पाश्चात्त्यशिक्षया सह तत्सभ्यतामपि सादरमभ्यस्तवन्तो नेतारो यदि प्रकृतोपयोगित्वं जानन्तोऽपि प्राच्यभावधारासंरक्षिका सेति दोषेण तामुपेक्षेरन् तदागतिका वयम्। एतदपि विचारबुद्धिप्रहितचेतसा न चिन्तयितुं शक्यते। अस्माकं नेतारः सर्वथा कुशला विचारबुद्धिसम्पन्नाः समदर्शिनः। पाकीस्तानादिविभागेन काश्मीरसङ्कटेन वैदेशिकराजनीतिसमतासंरक्षणयत्नेन च ते गृहीतचित्ता—नावकाशस्तेषां भाषादिचिन्तायाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



हिन्दीभाषाया राष्ट्रभाषात्वे तत्तत्प्रदेशवासिनो गुरुपदमलङ्कुर्वाणाः कथञ्चित समुन्नतिं लप्स्यन्ते—लम्भयिष्यन्ते च समुन्नतिं दुर्बलहिन्दीभाषां कथञ्चित्। अन्याश्च प्रादेशिक्यो भाषा अप्रयोजनीयतया दुर्बला मृतप्राया भवितारः। इतश्च शब्दसम्भाराहरणार्थं संस्कृतभाषाशब्दभाण्डारस्य मुखापेक्षित्वमपि स्थास्यति हिन्दीभाषायाः। भारतीयप्रादेशिकभाषासु हिन्दीभाषासाहित्यं नैतादृशं समृद्धिं लब्धवद् यया समृद्धया सा ज्येष्ठाधिकारं लभेत। प्रचलितासु भारतीयभाषासु सुसमृद्धाया वङ्गभाषाया राष्ट्रभाषात्वेऽपि प्रादेशिका दोषाः प्रादुःस्युः ! अतः सर्वां दिशं विविच्यास्माकं प्रेक्षावन्तो नेतारो यथाकालं संस्कृतभाषाया राष्ट्रभाषात्वमुद्घोषयिष्यन्तीत्याशास्महे। एवं च सति भाषाभित्तिकप्रदेशसंघटनसङ्कटप्रादेशिकभाषादिदोषप्रदर्शनविद्वेषादयः सर्वे दोषा अपगमिष्यन्ति। सर्व एव भारतीया अस्माकं संस्कृतभाषा राष्ट्रभाषा जातेति मन्यमानाः सन्तुष्टिं लप्स्यन्ते। आन्तर्जातिककार्य्यनिर्वाहार्थमाङ्गलभाषा स्थास्यति—क्रमशः प्रचारेण कदाचित संस्कृतभाषापि तत्स्थानमधिकर्तुं शक्ष्यति। पृथिव्यां सर्वत्रैव संस्कृतभाषाया अनुशीलनं दृश्यतेऽधुना। इत्थञ्च शिक्षाव्यवस्थायामपि संस्कृतभाषाङ्गलभाषामातृभाषेति भाषात्रयशिक्षणेनैव समापतितस्य माध्यमिकशिक्षासङ्कटस्य परिहारो भविष्यतीति किमनुपपन्नम् ?

---

## प्रीतिविडम्बनम्

निकृष्ट मृतकृष्टमवैति लोको
गुणाधिकादन्यसुतात् स्वपुत्रम्।
अहो महामोहमयः प्रभावः
स्वाभाविकः प्रीतिविड़म्बनायाः॥

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# योगिभक्तचरितम्

( काव्यम् )

द्वितीयः सर्गः

(निबन्धकः—श्रीकाश्यपकविः)

( पूर्वानुवृत्तम् )

तस्मादूर्द्ध्वं योग्यदेशादि दृष्ट्वा ते सम्प्राप्ता जन्म लोकानुकूल्या ।
तेषामेको जन्मनालञ्चकार पायराट्टुङ्गीग्राममत्यन्तपूतम् ॥१

कालीघट्टान्नातिदूरे स्थितस्य हावड़ादेशस्यान्तरे ग्राम एषः ।
यस्मिन् देवब्राह्मणा मानभाजः प्राच्याचारो यत्र नास्ति जगाहे ॥२

श्रीपार्वतीचरणनामकभूमिदेवो यस्मिंस्तदा सुचरितः किल भूमिनाथः ।
सर्वाः प्रजा निजसुतानिव योऽभिरक्षन् कीर्त्तिं परामधिचकार विकार-
शून्यः ॥३

देवब्राह्मणयोरभूदतितरां श्रद्धा तदीयान्तरे
प्राच्याचारपरम्परा प्रतिपदं तत्र प्रतिष्ठां गता ।
नो बाधा प्रजिगाय कापि नियमानस्य प्रतिष्ठाजुषः
मानं मानविहीनमेष समगात् तत्र स्थितानां नृणाम् ॥४

ब्राह्मे मुहूर्त्ते स विहाय शय्यां नित्येषु कृत्येषु बभूव लग्नः ।
प्रातः प्रभृत्येव गृहं तदीयं परं पवित्रं मनुजैः प्रतीये ॥५

नानाविधदेवगुरुस्तवाद्यै र्गेहं तदीयं मुखरत्वमाप्त्वा ।
पल्लीगतानां हृदये जनानां सन्दीपयामास पवित्रभावम् ॥६

क्षुधातुरेभ्यः स ददे सदन्नं शीतार्द्दितेभ्यो विततार वस्त्रम् ।
तद्गेहमासाद्य न दीनसङ्घा आशाविभङ्गेन विषादमीयुः ॥७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अकारि तेनातिथिराजिपूजा समादरेणैव सदा स्वगेहे ।
अभ्यागतास्तुष्टिमुपेत्य सर्वे हृदा च वाचा च शिवं शशंसुः ॥८

सर्वाः समास्तद्भवने पवित्रे पूजादिपुण्योत्सवदीप्तिरासीत् ।
तद्ग्रामसंस्था मनुजाः समस्ता येनातिमात्रं सुखमन्तरापुः ॥९

मृदङ्गवीणापटहप्रणादास्तदुत्सवानां व्यदधुर्विवृद्धिम् ।
उच्चैः समुच्चारितमन्त्रशब्दैरामन्त्रितास्तत्र सुराः प्रसेदुः ॥१०

विष्णुं शिवं शक्तिमथापरां वा स देवतां तुल्यमुपाचचार ।
दधौ न कुत्रापि लघुत्वबुद्धिं सर्वत्र मेने सदृशेशभूतिम् ॥११

श्रुतिस्मृतिप्रोक्तविधिप्रपञ्चे श्रद्धा बभूवार्थवती क्रियाभिः ।
न मात्रयापि स्थितिमस्य धर्म्यां संसारधर्मानुगतिर्बबाधे ॥१२

आहारशुद्ध्या नियतं समिद्धया स सत्त्वशुद्धिं समवाप संयतः ।
सञ्चारयामास मनोरथं निजं स सत्पथे दीप्तविवेकसारथिः ॥१३

न स प्रजाभ्यः करमाददे बुधः पुरा पुराणैः परिकल्पिताद् बहिः ।
न पीड़यामास कराय कञ्चन प्रवञ्चयामास न कञ्चनापरम् ॥१४

स पूतचित्तः परिशुद्धकर्मा धर्मो लसन्मूर्त्तिरिवावभासे ।
तेनाधिकारे प्रससार धर्मो नाधर्मवृत्तिर्जनतां जगाहे ॥१५

पत्नी च तस्य त्रिपुराभिधाना सतीकुलस्याभरणं गुणाढ्या ।
पत्युः समानैव विशुद्धशीला विभूषयामास तदीयगेहम् ॥१६

लक्ष्मीरिवासौ गृहकर्मदक्षा दीक्षावती धर्म्यविधौ पवित्रे ।
चरित्रभूत्या स्वजनान् समग्रान सन्तोषयामास गृहे तदीये ॥१७

सा स्वामिनं दैवतमेव मेने तमन्वगादेव सदा क्रियाभिः ।
तदाश्रिते सद्मनि तत्र काचित नापक्षयं प्राप पुराणरीतिः ॥१८

सा कोमलान्तःकरणा नयज्ञा दयावती दीनगणेषु नित्यं ।
अन्नादिदानेन पतिं स्वधर्मे साहायकेनोपचचार शक्त्या ॥१९

मालिन्यमन्ये ददृशुर्न तस्याः सहास्यमास्यं विपुले श्रमेऽपि ।
वाणी तदीया मधुरा समेषां भाति स्म पीयूषरसोपमाना ॥२०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भृत्यादयस्तद्गुणवश्यचित्ताः तां मेनिरे मातरमेव साक्षात् ।
सा चापि तेषां जननीव नित्यं दुःखे सुखे चाजनि सावधाना ॥२१
महोत्सवानामिव मूर्त्तिरेषा महोत्सवं तद्भवनं व्यधत्त ।
वधूमवाप्ता गुरवः पुरा यां सौभाग्यभूमानमिहान्वभूवन् ॥२२
तस्याः सदाचारपरम्पराभिः विशुद्धबुद्ध्या विनयं वहन्त्या ।
सर्वक्रियादक्षतया च तस्मिन गेहे सदा मङ्गलमाप वृद्धिम् ।।२३
तद् गेहमेवाथ विविच्य योग्यं स्वजन्मने सोऽच्युतभक्तवीरः ।
विवेश पूतं त्रिपुराशरीरं श्रीदेवकीदेहमिवासुरारिः ॥२४
अथाग्निबाणाब्दम-बङ्गवर्षे मासे पवित्रे किल मार्गशीर्षे ।
तिथौ चतुर्थ्यां सितपक्षभाजि प्रासूत देवी त्रिपुरा सुतं स्वम् ॥२५
तदान्तरिक्षं विमलं चकाशे प्रभाकरोऽदीपि मितप्रभाभिः ।
शान्तः समीरः प्रववौ समन्तात् स्रोतस्वती शान्तरया तदासीत् ॥२६
प्रसूनगन्धेन दिशः प्रपूर्णाः सङ्गीतमग्ना मधुपा बभूवुः ।
वीणामृदङ्गानकशङ्खघण्टानादः प्रकीर्णः सुरमन्दिरेभ्यः ॥२७
अभूत्तदा मङ्गलपुष्पवृष्टिः प्रसन्नशून्याद् विबुधैः प्रयुक्ता ।
प्रभूतमाङ्गल्यविधिप्रचारैः सुसङ्कुलं तद्भवनं बभूव ॥२८
आनन्दपूर्णे भवने च तस्मिन् प्रजाः प्रहृष्टाः शतशः समेताः ।
दिदृक्षमाणाः प्रभुपुत्ररत्नं सन्तोषिताश्चापि बहूपचारैः ॥२९
विघोषयन्त्यो विजयं तदीयं ता नन्दयासासुरलं प्रभुं स्वम् ।
दृष्ट्वा शिशुं देवकुमारकल्पं भाविस्वकल्याणविदो ननन्दुः ॥३०
आकर्णविस्तीर्णदृशं सुगौरं विशालवक्षःस्थलमुन्नतांसम् ।
आजानुसंलम्बितबाहुयुग्मं गभीरनाभिहृदसुचनासम् ॥३१
शान्तस्वभावं सुविशालभालं तं बालमालक्ष्य जनाः समेताः ।
महाजनं कञ्चन भाविकाले मत्वा दधुस्तत्र गुरुत्वबुद्धिम् ॥३२
पित्रोस्तथात्मीयनृणां प्रमोदैः समं स बालो ववृधे क्रमेण ।
नगेन्द्रवत् स्थैर्य्यगुणाढ्यमेनं नगेन्द्रनाथेति पिताजुहाव ॥३३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



स शैशवादेव बभूव शान्तो देवेषु विप्रेषु च भक्तियुक्तः ।
न बाल्यचापल्यमसौ प्रपेदे बालो यथा विन्दति कालयोगात् ॥३४

न क्रीड़ने प्राप रतिं वयस्यैः स निर्जनस्थानगतः प्रशान्तः ।
तातस्य साम्येन निमीलिताक्षः कस्यापि चिन्तानिरतो बभूव ॥३५

पित्रादिभिः प्रत्यहमेव भक्त्या प्रवर्त्तितां सद्मनि देवपूजाम् ।
समीक्ष्य तत्रातिरतिं प्रपन्नः तानन्वकार्षीद्रहसि प्रविष्टः ॥३६

स श्रीहरेर्गुणमयीमुपलभ्य गीतिं भावस्थिरो मनसि शान्तिमुपाससाद ।
हेतोः कुतश्चन विलापकृतश्च तस्य सङ्कीर्त्तनादिकमभूत् किल
शान्तिबीजम् ॥३७

स्थानान्तरात् समधिकः प्रणयोऽस्य दृष्टो देवालयादिषु परिभ्रमणं गतस्य ।
वृक्षान्तराच्च तुलसीतरुषु प्रभूता चित्तानुरक्तिरुदपादि शिशोः प्रकृष्टा ॥३८

स श्रीफलाचलतले तुलसीतले च भक्त्या कदापि विवशो विलुलोठ बालः ।
यद्दर्शनेन गुरवः किल तस्य चित्तं सम्भाव्य वातविकृतं सभया बभूवुः ॥३९

आमन्त्रिताः सुविदिता बहुमन्त्रवैद्याः चक्रुर्विकारशमनाय चिरं प्रयत्नम् ।
वातामयं शमयितुं भिषजः सुविज्ञाः चक्रुः प्रयत्नमपि तद्गुरुभिः
प्रयुक्ताः ॥४०

भावानुसारपटवः स्थविराः सुधीरास्तं देवभक्तिपरिपूतहृदं शशंसुः ।
भावः क्रमेण ववृधे स तदीयचित्ते कृत्येषु च प्रसृतिमाप निरापदेव ॥४१

क्रमाद् वत्सरे पञ्चमे सम्प्रपन्ने शिशोरस्य विद्याविकाशाय तातः ।
न्यदिक्षच्च विद्यागृहे सम्प्रवेशं विशेषेण यत्राभवत्तस्य शिक्षा ॥४२

विजिग्ये सतीर्थ्यानसौ पाठमग्नः प्रशंसामवापुः परां शिक्षकाणाम् ।
समाप्यादिशिक्षां परत्र प्रधाने प्रविष्टः स विद्यागृहे शिक्षणार्थम् ॥४३

तदासौ न्यमज्जत् सदा पाठकृत्ये नवं वस्तुजातं प्रहृष्टः शिशिक्षे ।
समग्राः सतीर्थ्या धिया तस्य भग्नाः परिम्लानचित्ता विशेषाद् बभूवुः ॥४४

नानाविद्यालाभधन्यः स काले शक्त्योत्तीर्य्योत्कृष्टमानां परीक्षाम् ।
हर्षोत्कर्षं व्यादधे बान्धवानाम् योगीवेद्धां सिद्धिमासाद्य सद्यः ॥४५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


तस्मिन् काले पूर्वसंस्कारयोगात् प्राणायामे कामनामेष वव्रे ।
तीव्रोत्साहं स व्रतं साधयित्वा दीर्घं कालं सिद्धिमाद्यां प्रपेदे ॥४६
कञ्चित् कालं कुर्वतो योगकृत्यं शून्ये तस्यावस्थितिः सुस्थिराभूत् ।
योगाचारे नित्यमित्थं स्थितस्य सिद्धिः शुद्धा भूयसी तस्य जज्ञे ॥४७
यत्सम्पर्कादूर्द्ध्वरेता महात्मा सोऽयं जातो नैष्ठिकब्रह्मचारी ।
तं तं योगं सोऽन्वतिष्ठद्रहस्यं विघ्नं मत्वा स्वे विधाने विधिज्ञः ॥४८
काले सोऽयं प्राप भूरिप्रकाशं शुद्धे शून्ये के न पश्यन्ति भानुम् ।
वासः क्षारेणेव नैर्मल्यमाप्तं चित्तं तस्य क्षालितं संयमेन ॥४९
नो तस्यासीत् संसृतौ रागलेशः पित्रोर्भक्तिं वर्जयित्वा प्रदोप्ताम् ।
दृष्ट्वा तस्मिन् भूरि वैराग्यमेवं मातापित्रोश्चञ्चलं चित्तमासीत् ॥५०

( क्रमशः )

---

श्रीलकृष्णदासकविराजगोस्वामिप्रणीत-

## श्रीचैतन्यचरितामृतस्य संस्कृतानुवादः

अनुवादकः—श्रीभास्करानन्दसरस्वतीस्वामी

### श्रीचैतन्यचरितामृते मध्यलीलायां

प्रथमः परिच्छेदः

( पूर्वानुवृत्तः )

एकेनैव स्वरूपेण श्लोकार्थो विदितः खलु ।
श्रीरूपो दैवयोगेन तस्मिन् वर्षे समागतः ॥
तदा श्रीरूपगोस्वामी श्लोकं श्रुत्वा प्रभोर्मुखात् ।
तस्य श्लोकस्य भावार्थश्लोकं तत्रैव निर्ममे ॥
श्लोकं विरचयन्नेकं तालीपत्रे विलिख्य सः ।
निवेश्य निदधे तच्च स्वगेहपटलान्तरे ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



श्रीरूपे श्लोकमाधाय स्नातुं याते च सागरम् ।
प्रभुस्तन्मिलनाकाङ्क्षी तन्निवास उपस्थितः ।
सनातनश्च रूपश्च हरिदासश्च ठक्कुरः ।
त्रय एते न यान्ति स्म श्रीजगन्नाथमन्दिरम् ॥
विलोक्योपलभोगं श्रीजगन्नाथस्य स प्रभुः ।
त्रिभिरेतैश्च सङ्गत्य निजवासं गतोऽभवत ॥
त्रिष्वेतेषु यदा तत्र यतमोऽभूदुपस्थितः ।
सङ्गतोऽभूत प्रभुस्तेन सहेति नियमः प्रभोः ॥
प्रभुर्दैवात्तदा गच्छन्नूर्द्ध्वं यावन्निरैक्षत ।
छदिरारोपिते तालीपत्रे श्लोकं तमाप्तवान ॥६०॥
पठित्वा श्लोकमासीनं भावाविष्टं महाप्रभुम् ।
सम्प्राप्तो रूपगोस्वामी दण्डवन्न्यपतद् भुवि ॥
उत्थायैव चपेटेन तमाहत्य महाप्रभुः ।
किञ्चिद्वदितुमारेभे क्रोड़े कृत्वा च तं पुनः ॥
श्लोकेऽस्मिन्मदभिप्रायं नैव जानाति कश्चन ।
मम मानसिकीं वाणीं कथं त्वमवगच्छसि ॥
इत्येवं कथयंस्तस्मिन् कृत्वा बहुमनुग्रहम् ।
प्रभुः श्लोकं तमानीय श्रीस्वरूपमदर्शयत ॥
अथ विस्मयमाविष्टः स्वरूपं पृष्टवान् प्रभुः ।
रूपः कथं विजानाति मानसीं मे कथामिति ॥
स्वरूपः प्रत्युवाचाथ यथासौ वेत्ति ते मनः ।
मन्ये तथा भवेत सोऽयं तव कारुण्यभाजनम् ॥
प्रभुरूचेऽथ सन्तुष्टहृदयः सन्नहं पुनः ।
सञ्चार्य निखिलाः शक्तीः समालिङ्गितवानमुम् ॥
निगूढ़रसतात्पर्यबोधेऽसावाधिकारिकः ।
अतो गूढ़रसव्याख्यां त्वममुष्मै वदिष्यसि ॥

२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



इत्यादिकानि वृत्तानि पुरा विव्रियते मया ।
किञ्चिदुक्तं समासेन प्रसङ्गं प्राप्य साम्प्रतम् ॥

"तथाहि पद्यावल्यां श्रीरूपगोस्वामिचरणरचितः
श्लोकः ( ३८७ )

प्रियः सोऽयं कृष्णः सहचरि कुरुक्षेत्रमिलित-
स्तथाहं सा राधा तदिदमुभयोः सङ्गमसुखम् ।
तथाप्यन्तः खेलन्मधुरमुरलीपञ्चमजुषे
मनो मे कालिन्दीपुलिनविपिनाय स्पृहयति ॥७॥"
अस्य श्लोकस्य संक्षिप्तमर्थं शृण्वन्तु वैष्णवाः ।
अवलोक्य जगन्नाथं यथाभावोऽभवत् प्रभोः ॥७०॥
यद्यपि श्रीमती राधा लेभे कृष्णस्य दर्शनम् ।
कुरुक्षेत्रे तथाप्यस्या इत्थम्भावोऽभवद्धृदि ॥
राजवेशोऽयमेतच्च हस्त्यश्वनरसङ्कटम् ।
क्वासौ स गोपवेशोऽस्य क्व तद्वृन्दावनं रहः ॥
भावं तमेव तं कृष्णं तच्च वृन्दावनं पुनः ।
यदि प्राप्नोमि वाञ्छा मे तदा गच्छति पूर्णताम् ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे द्व्यशीतितमाध्याये
पञ्चत्रिंशश्लोकः—

आहुश्च ते नलिननाभ पदारविन्दं
योगेश्वरैर्हृदि विचिन्त्यमगाधबोधैः ।
संसारकूपपतितोत्तरणावलम्बं
गेहं जुषामपि मनस्युदियात् सदा नः ॥८॥"
तवेदं चरणाम्भोजं मम व्रजपुरालये ।
उदितं यदि पश्यामि पूर्णकामा भवाम्यहम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



गूढं भागवतश्लोकभावार्थं स्फुटयन्निमम् ।
श्लोकं श्रीरूपगोस्वामी लोकबोधाय निर्ममे ॥

तथाहि ललितमाधवे दशमाङ्के षट्त्रिंशश्लोकः—

या ते लीलापदपरिमलोद्गारिवन्या परीता
धन्या क्षौणी विलसति वृता माधुरी माधुरीभिः ।
तत्रास्माभिश्चटुलपशुपीभावमुग्धान्तराभिः
संवीतस्त्वं कलय वदनोल्लासि-वेणुविहारम् ॥६॥"

एवं यदा जगन्नाथमीक्षाञ्चक्रे महाप्रभुः ।
सुभद्रासहितं वंशीपरिहीणकराम्बुजम् ॥
व्रजेन्द्रनन्दनं श्यामं व्रजे त्रिभङ्गसुन्दरम् ।
क प्राप्स्यामीति वाञ्छास्य ववृधेऽनुक्षणं तदा ॥
श्रीराधाया यथोन्माद आसीदुद्धवदर्शनात ।
तथोद्घूर्णा प्रलापाश्चाभवन रात्रिन्दिवं प्रभोः ॥
अवशिष्टानि वर्षाणि द्वादशैवं निनाय सः ।
इत्थं त्रिधा विभक्ताश्च शेषलीलां समाचरत ॥
चतुर्विंशतिमब्दान् स प्रव्रजन यान्यथाचरत ।
अनन्तं कर्मणां तेषां मर्म को वेत्तुमर्हति ॥८०॥
तेषां कर्त्तुं समुद्देशं दिङ्मात्रं परिदर्शयन ।
लीलानां मुख्यमुख्यानां सूत्राणि विदधाम्यहम् ॥
सूत्रं हि प्रथमं तावत सन्न्यासग्रहणं प्रभोः ।
प्रेमावेशेन तस्याथ वृन्दावनगमोद्यमः ॥
परितो भ्रमणं तस्य राढ़देशे दिनत्रयम् ।
प्रेमावेशेन वैक्लव्यं बाह्यविस्मरणं ततः ॥
यमुनेति ब्रुवन् गङ्गां भ्रान्तिमुत्पादयन् प्रभोः ।
नित्यानन्दप्रभुर्गङ्गातोरमेवानयच्च तम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



आचार्यस्य गृहे शान्तिपुरेऽथागमनं प्रभोः ।
तत्र च प्रथमा भिक्षा रात्रौ सङ्कीर्त्तनं ततः ॥
जनन्या निजभक्तैश्च तत्र सम्मेलनं तदा ।
समाप्य निखिलं कर्म नीलाद्रिगमनं ततः ॥

( क्रमशः )

---

# कपालकुण्डला-रूपकम्

## प्रस्तावना

( सूत्रधारस्य गृहप्राङ्गणम् )

प्रविशति नान्दीपाठकः

अभिनवसुमनोभिर्निर्मितश्चातिरम्यो
मलयजरसमिश्रः षट्पदैः सेव्यमानः ।
बुधमुदमिह पुष्णन् सिद्धिमुच्चैर्विधत्तां
हरिचरणसपर्याकोर्णपुष्पाञ्जलिर्नः ॥
शवशिवहृदयस्था खड्गमुण्डाभिरामा
प्रलयघनघनाभा मुक्तकेशी कराला ।
दलितदनुजमुण्डैस्तारहारं दधाना
मृतकररसना सा दक्षिणा पातु माता ॥

( निष्क्रान्तः )

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



( ततः प्रविशति सूत्रधारः )

सूत्रधारः—अलमतिप्रसङ्गेन । अद्य खलु संस्कृतसाहित्यपरिषदः सप्तत्रिंश-वार्षिकमहोत्सवे नानादिगन्तागतैः श्रुतप्रकाशैर्बहुश्रुतैरादिष्टोऽस्मि किञ्चन नूतनरूपकम् अभिनेतव्यमिति । तत्र कतमत् रूपकमाश्रित्य एतेषां चित्तविनोदनं करिष्यामि ? ( विचिन्त्य ) आम, अस्ति कानुरग्रामवास्तव्यो वाशिष्ठो हरिचरणविद्यारत्नो नाम ।

अनूद्य यो वङ्किमचन्द्रनिर्मितां
कथां मनोज्ञां हि कपालकुण्डलाम् ।
काव्यं कवेरोमरखैयमस्य तद्
गिरा सुराणामगमद् यशो महत् ॥

तस्यैव सूनुना संस्कृत-साहित्यपरिषदोऽन्यतमसम्पादकेन श्रीमता विष्णुपदभट्टाचार्येण रूपकाकारेण परिणमिता सा कपालकुण्डलाकथा ।

तस्मात्......

नवकुमारः—( नेपथ्ये ) कष्टं भोः कष्टम् ।

सूत्रधारः—(श्रुतिमभिनीय विस्मितः) अये किमिति विज्ञापनव्यग्रे मयि शब्द इव श्रूयते । भवतु पश्यामि ( नेपथ्याभिमुखं किञ्चित् गत्वा विलोकयन् तिष्ठति ) ।

नवकुमारः—( नेपथ्ये ) कष्टं भोः कष्टम् ।

सूत्रधारः—( निश्चित्य ) हन्त दृढं विज्ञातम् ।

श्रीमान् नवकुमारोऽयं कृतघ्नैः सहयात्रिभिः ।
विजनेऽब्धितटे त्यक्तः शरणं परिमृग्यति ॥　(निष्क्रान्तः)

[इति प्रस्तावना]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# प्रथमोऽङ्कः

## [प्रथमं दृश्यम्]

( गङ्गातीरसमीपवर्त्ति नदीतटम् अस्तगमनोन्मुखः सूर्यः ।
नेपथ्ये गीयते )

दूरादयश्चक्रनिभस्य तन्वी
तमालतालीवनराजिनीला ।
आभाति वेला लवणाम्बुराशे-
र्धारानिबद्धेव कलङ्करेखा ॥

( ततः प्रविशति काष्ठभारं कुठारं च भूमौ निधाय वस्त्रान्तबद्धकटिः क्लान्तः समुद्विग्नश्चोपविष्टो नवकुमारः )

नवकुमारः—कष्टं भोः कष्टम् ।

येषामिन्धनमाहर्त्तुं प्राप्तोऽस्मि विजनं वनम् ।
कृतवेदितया त्यक्तैस्तैरेवाहं समुज्झितः ॥

( समन्तात् समालोक्य हताशः ) अहो वेलापरिवर्तनमपि परिणतिं गतम् । प्रत्यावर्तनप्रवृत्ता चेन्नौका नूनम् एतावता कालेन समुपस्थिता भवेत् । शङ्के जलोच्छ्वासवेगेन नौका जलमग्ना, उत वा आरोहिणो मां परित्यज्य गता इति । निरावरणो निराश्रयश्चास्मि मन्दभाग्यः । साम्प्रतं क्व नु खलु गच्छामि । (दिशो विलोक्य) इह हि—

नवो ग्रामः कश्चिन्न च पुनरिहास्ते बत जनो
न चैवाप्याहार्यं किमपि सुलभं नैव च पयः ।

(श्वापदशब्दश्रुतिमभिनीय भीतः)

पशूनां हिंस्राणां श्रवणपथमभ्येति हि रवो
निरालम्बस्तावत् कमहमधुना यामि शरणम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



( पुनः समन्ताद् विलोक्य दूरे आलोकं दृष्ट्वा आशान्वितः )

अये दूरे आलोक इव दृश्यते, ( विचिन्त्य ) नायं दावानलकालः ! आलोकपरिधिश्च क्रमशो वर्द्धितायतनः समुज्ज्वलतरो भवति। तन्नूनं मानवसमागमेन भवितव्यम्। यथा तथा वा भवतु, तत्त्वत ऐवैनं ज्ञास्यामि।

(निष्क्रान्तः)

## द्वितीयं दृश्यम्

( प्रविशति सागरतटे महाश्मशाने प्रज्वलिताग्निसमीपे शवासीनो ध्याननिमग्नः कापालिकः। )

कापालिकः—

कालाभ्राभाट्टहासा विगलितचिकुरा भीमवक्त्रा कराला
दिग्वस्त्रा घोररावा प्रकटितदशना बाणयुग्मावतंसा।
दैत्यानां छिन्नमुण्डैर्निपुणविरचितां मालिकां सन्दधाना
प्रेतासीना प्रमत्ता मधुमदमुदिता कालिकास्तु श्रिये नः॥

नवकुमारः—( प्रविश्य कापालिकं दृष्ट्वा स्वगतम् )

भोः को नु खल्वेषः ?

ज्वाज्वल्यमानस्य हुताशनस्य
स्थित्वा समीपे नयने निमील्य।
ध्याने निमग्नः स्थिरपूर्वकायो
विभाति चित्रे लिखितो यथासौ॥

(निपुणमवलोक्य) अपिच—

गलितशवनिषण्णो व्याघ्रचर्मावृताङ्गः
कनककपिशदीर्घं सन्दधानो जटौघम्।
वहति हि गलदेशे कीकसैरक्षमालां
विलसति नृकरोटं कारणाढ्यं पुरोऽस्य॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



तन्नूनम् अनेन केनचित् कापालिकेन भवितव्यम् (सशङ्कस्तिष्ठति)

कापालिकः—( ध्यानावसाने चक्षुरुन्मील्य पुरतो नवकुमारं दृष्ट्वा ) कस्त्वम् ?

नवकुमारः—(भीतभीतः) ब्राह्मणोऽहम् ।

कापालिकः—(साग्रहं नवकुमारमवलोक्य) तिष्ठ ।

(सशङ्को नवकुमार उपविशति कापालिकश्च स्तौति )

गलितरुधिरधाराकीर्णसृक्कद्वयान्ता
दलितदनुजमुण्डं शोणिताक्तं दधाना ।
तरुणमिहिरनेत्रा घोरदंष्ट्रा करालां
जयति जयति काली सिद्धिदा साधकानाम् ॥

(कापालिक आसनादुत्थाय नवकुमारसमीपं गच्छति नवकुमारश्च तस्य पुरः कृताञ्जलिस्तिष्ठति ) माम् अनुसर ।

नवकुमारः—( कानिचित् पदानि गत्वा ) महाभाग ! क्षुत्पिपासा-कातरोऽहम् । कुत्र गत्वा आहार्यं लप्स्ये इति ज्ञातुमिच्छामि ।

कापालिकः—भैरवीप्रेरितोऽसि । परितोषस्ते भविष्यति । माम् अनुसर । ( किञ्चित् गत्वा कुटीरं दर्शयन् ) अदूरे दृश्यते मे कुटीरम् । तत्र यानि फलानि मूलानि वा सन्ति तानि उपयोक्तव्यानि । पत्रपुटेन कलसजलं पातव्यम् । रोचते चेत् व्याघ्रचर्मास्तीर्य शयनीयम् । न विद्यते अत्र व्याघ्रात् कापि भीतिः । समये मया सह दर्शनं भविष्यति । (कतिचित् पदानि गत्वा पुनः नवकुमाराभिमुखो भूत्वा ) यावन्नाहं प्रत्यावर्ते तावत् कुटीरं मे न त्यक्तव्यम् । ( निष्क्रान्तः )

( क्रमशः )

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



9. **Introduction to the Rigveda** of Sayanacharya—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4-for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan, As.14; As. 10 (for members

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahopadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramanath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A. Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkaharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16 **Yatratattvam** of Raghunandana Bhāttacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakravarti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). (Out of stock)

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof.Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members),

24. **Sataranja Kutuhalam**—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam** (a new Mahakavya) of MM. Kalipada, Tarkacharya, Rs, 5;Rs, 4-8 (for members),

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সংস্কৃত-সাহিত্য-পরিষদ্-গ্রন্থমালার ২৬-তম পুষ্প

সদ্যঃ প্রকাশিত

ভারত সেনকৃত অপূর্ব্ব ব্যাকরণ গ্রন্থ

# "সুখলেখনম্"

সম্পাদক—শ্রীরামধন শাস্ত্রী

—:*:—

- মাণবক-গৌরবম্।
- ব্রাহ্মণ-সর্ব্বস্বম্।
- কপালকুণ্ডলা-রূপকম্।

[ তিনখানি গ্রন্থও শীঘ্রই প্রকাশিত হইতেছে। ]

## গ্রাহকগণের প্রতি অনুরোধ

বহু সদস্যের দেয় বার্ষিক চাঁদা দীর্ঘকাল বাকি পড়িয়া আছে। তাঁহারা তাহা পরিশোধের জন্য দয়া করিয়া পরিষৎ-সম্পাদকের সহিত পত্রালাপ করুন। ইতি—

বিনীত—

পরিষৎ-সম্পাদক-সংঘ।

১৬৮।১, রাজা দীনেন্দ্র ষ্ট্রীট

শ্যামবাজার, কলিকাতা ৪

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXX.
No. 8
४०श-वर्षस्य
८म-संख्या

December, 1957
१८७९शकीये
अग्रहायणे
मासे

# संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थश्च

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता

वार्षिकमूल्यम्—रूप्यकषट्कम् ६)
Foreign price—1-4d

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# Sanskrit Sahitya Parishat Series

(Revised up to December, 1957)

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (Out of stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhanta-bhushan. Re. 1-4 ; Re. 1. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshina-charan Bhattacharya. (Out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kalipada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshina charan Bhattacharya. Rs. 2-8. (Out of stock.)

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

9. **Introduction to the Rigveda** of Sayanacharya—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4 for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14; As. 10 (for members

(Cont. to Cover 3rd Page)

---

Printed by Bishnupada Bhattacharya M.A. Kavyatirtha.at Calcutta Oriental Press Private Ltd., 9, Panchanan Ghose Lane, Calcutta and published by the same from Sanskrit Sahitya Parishad, 168/1, Raja Dinendra Street, Shyambazar, Calcutta-4.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं संस्कृत-साहित्य-परिषत् प्रतिमा रवेः।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

संस्कृतसाहित्यपरिषत्

Vol. XXXX. No. 8 | १८७९-शकीये अग्रहायणे ४०श-वर्षस्य ८म-संख्या | December 1957.

# मतिमञ्जरी

"छिन्ने मूले नैव शाखा न पत्रम्"

[ निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः ]

विविधविशृङ्खलाविघटितस्य जगतः शान्त्यर्थं विविधानेवोपायानवलम्बन्ते मनीषिणो भारतीया देशान्तरवासिनश्च। तेषां सर्व एव प्रयत्ना विफला विपरीतफला वा, क्रमशो विवर्द्धन्ते सङ्कटविशेषा, न लेशतोऽपि दृश्यते साफल्यम्। तत्र कारणपरम्परापर्य्यालोचनेनास्माभिरेवमनुमीयते यत्-पूर्व्वसूरीणामनुशासनलङ्घनमेवात्र कारणम्। सर्व्वे सद्धर्मा न सर्व्वेषु जीवजातेषु कदाचिदपि दृष्टाः। केचन धर्मा जीवसाधारणानां, केचन मनुष्यसाधारणानां, केचन मनुष्यविशेषाणानामित्येवं क्रमेण निसर्गत एवाविर्भूता विलोक्यन्ते। तत्र तत्र विशेषपर्य्यवेक्षणेन पर्य्यालोचनया च पृथिव्यामनुशासनरूपं शास्त्रं-प्रणीतं तत्तद्देशकालपात्रानुगुणं तत्तद्देशीयविद्वद्भिर्विचक्षणैः साधनसम्पन्नै-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



स्त्रिकालदर्शिभिः। मनुजान् विरुद्धबुद्धिसम्पन्नान् विज्ञाय तैः श्रेणीविभागः कृतः। ते चास्मद्देशे ब्राह्मणक्षत्रियविट्शूद्ररूपेण परिगण्यन्ते। ततश्च वर्णविशेषस्य वयोविशेषकृत्यस्याश्रमधर्मस्य च निर्देशेन वृत्तिविभागः सम्पादितः। एवं वैज्ञानिकैरुपायैस्तैर्वृत्तिविभागः कृतो यथा कुत्रचित् किञ्चिदपि कथञ्चिदसमञ्जसं न स्यात्। स एष वर्णाश्रमाचारप्रासादोऽधुनापि गौरवेण विराजते। स्वाधीना वा विश्रृङ्खलगतिसम्पन्नत्वेनासंयतमतयो वा वयं प्रासादवाससुखं विस्मृत्य स्वेच्छया तत्र तत्र विहरामः। तदानीमपि महाभारतादियुगेषु राजान आसन्। तेषामपि स्वराष्ट्रपरराष्ट्रादिविषयकं ज्ञानमासीत्। समदर्शिभिः संप्रणीता राजधर्मास्तैरपि प्रतिपालिताः। राज्यविस्तारोऽपि कृतस्तैः। किन्तु मनुष्यसाधारणधर्मा दयादाक्षिण्यसरलतादिसद्व्यवहारा नैवोत्सृष्टाः। वर्णाश्रमधर्मपरिहारेणाधुना वृत्तिसङ्करः संघटितस्तेन च वृत्तिविरोधः सुतरां सम्पादितो राष्ट्रं पर्य्याकुलयति। ब्राह्मणास्तपोदानादिज्ञानसाध्यं कर्म विहाय "अनभ्यासेन वेदानामाचारस्य च वर्जनात्। आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसती"ति मनूक्तं सफलीकुर्वन्ति। क्रमेणानेन सर्वे सदाचारवर्जिता दुर्नीतिपरायणाः सञ्जाता अत एव "स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः। स्वकर्मनिरतः सिद्धिं विन्दती"त्यादीश्वरवाक्यभाजनतां न व्रजन्ति। राष्ट्रं प्रतिनियतमेव दुर्णयप्रतिरोधार्थं प्रयतते। तदीयाः सर्वाः प्रचेष्टाः सर्वथाः कथं विफलतां प्रसुवते ? बाल्यात् प्रभृति नैतिकशिक्षासदाचारपरिपालनादर्शादर्शनेन वंशधरा वंशक्रमेणैवाभ्यस्ता दुर्णयमार्गपर्य्यटने, न जानन्ति ते सदाचारवार्तामपि। यदि वा केचन स्मरन्ति तेषामेव "सत्यं वद, धर्मं चर, पितृदेवो भव, मातृदेवो भव, अतिथिदेवो भव" इत्याद्युपदेशान्, तथापि "ते खलुसद्धर्माअभ्यसनीयाः संसदि प्रकाशनीया एव, यतः केचन आदर्शपुरुषा नैतान् समनुतिष्ठन्तीत्यतो नैते समाचरणीया" इति हि तेषां विवेकः। इतश्च राष्ट्रं न तथाशिक्षाप्राप्तान् नागरिकान् कर्मविनिमयेनार्थिनः कर्त्तुं पारयति ; स्वाधीना नागरिका न स्वाधीनां जीविकामर्जयितुं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


प्रभवन्ति। अत एवागतिकास्ते तेषामादर्शत्वेन कल्पितान् पदस्थाननु-कुर्वन्तो दुर्नयमार्गं प्रविशन्तः क्लेशपरम्परामनुभवन्तीति किमत्र चित्रम् ? कः पन्था अवलम्बनीय इत्यस्य परीक्षा चलति। परीक्षान्ते यदा वर्णाश्रमप्रासादं प्रत्यागमिष्यन्ति मनुजास्तदैव जगतः शान्तिप्रतिष्ठा भविता। भारतीयशास्त्राणि जगतः कल्याणार्थं प्रणीतानि—न देश-विशेषस्य कल्याणाय—तदेतत् तैः कण्ठत एव समुद्घोषितम् ;—

"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥

ब्राह्मणा भारतवर्ष एव वर्तन्ते, नान्यत्र तद्धर्माण इति न मन्तव्यम्। सुतरां प्रकृतिविशेषं जन्मशिक्षादिक्रमेण विज्ञाय निपुणैः पृथिव्यां सर्वत्र वर्णाश्रम-धर्मः प्रवर्तयितुं शक्यते। यावत्त्रिकालहितानि परमेश्वराज्ञासिद्धानि शास्त्राण्युपेक्षितानि भविष्यन्ति तावत् सुखसमृद्धिलाभाशा गगनकुसुमायिष्यते।

---

कवीन्द्र-रवीन्द्रनाथस्य

## वङ्गाब्दीय-चतुर्दशशतकम्।

अनुवादकः—अध्यापक-श्रीदुर्गादासगोस्वामी एम. ए., साहित्यशास्त्री

अद्य प्रभृत्यपि परं शतवत्सरेभ्यः
कस्त्वं कुतूहलभरान्निभृते प्रकोष्ठे।
प्रेम्णा स्वयं पठसि मे कवितामनुच्चै-
रद्य प्रभृत्यपि परं शतवत्सरेभ्यः ॥१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


इहाद्याहं लेशादपि नववसन्तस्य मधुर-
प्रभातानन्दांशं कुसुममपि गीतिं विहगजाम्।
प्रहेतुं रागश्चारुणितमनुरागार्द्रमपि वः
करे शक्ष्याम्यूर्ध्वं न हि शतसमाभ्यः स्वयमहो ! ॥२

तथाप्युद्घाट्य त्वं सकृदपि निजं दक्षिणदिशि
स्थितं द्वारं वातायनतलगतः कल्पय हृदि।
दिगन्तालोकी यत् पुलककुलकं मर्मणि भुवः
कुतः प्राप्य स्वर्गादिह शतसमाग्रे समसजत् ॥३

नवोन्मत्ताधीरं स्खलितनियमं फाल्गुनदिनं
तथा चञ्चत्पक्षः कुसुमसुरभिर्दक्षिणमरुत्।
अकस्मादागत्य क्षितिमकुरुतां यौवनरुचा
किमप्यारक्तां प्रागिह शतशरद्भ्यः सरभसम् ॥४

जाग्रत् तदोत्तरलहृन्निजगीतिमग्नः
कश्चित् कविः समभवत् किल पुष्पवद् यः।
ऐच्छत् स्वतः कति कथाः कियतोऽनुरागात्
सद्यो विकासयितुमत्र शताब्दपूर्वम् ॥५

अद्य प्रभृत्यपि मुदा शतवर्षपारे
कोऽसौ कविर्नवतनो भवनेऽधुना वः।
गायत्यहो ! स्फुटगिरा निजगीतिराशी-
नद्य प्रभृत्यपि मुदा शतवर्षपारे ॥६

मयाद्यानन्देन प्रथममधुसंवर्धनमिदं
कवेः पाणौ तस्य प्रहितमपि गीतिर्मम मधोः।
मधौ ते गीतास्तु क्षणमलिरुते पल्लवरवे
तथा ते हृत्स्पन्देष्वपि शतसमाभ्यः परमहो ! ॥७

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# कपालकुण्डला-रूपकम्

( पूर्वानुवृत्तम् )

नवकुमारः—( स्वगतम् ) कापालिकस्य क्रूरत्वं प्रथितं जगतीतले ।
बुभुक्षितो निरालम्बस्तथापि यामि तद्वशम् ॥
(कुटीरं प्रति चलति)

कपालकुण्डला—( नेपथ्ये ) पथिक ! कच्चित् पथिभ्रान्तो भवान् ?

नवकुमारः—( स्वगतम् ) अये का नु खल्वेषा !

असंहृताकुञ्चितकेशपाशम्
आगुल्फलम्ब्यभ्रनिभं वहन्ती ।
मेघान्तरालक्ष्यमिवेन्दुबिम्बं
मुखं दधानालकराजिरम्यम् ॥

कपालकुण्डला—( नवकुमारसमीपमेत्य ) पथिक ! कच्चित् पथिभ्रान्तो भवान् ?

नवकुमारः—( आत्मगतम् ) अहो मधुरता अस्याः स्वरस्य ।

कपालकुण्डला—आगच्छ पन्थानं ते दर्शयिष्यामि । ( किञ्चित् गत्वा नीचैः ) भद्र ! पलायस्व । किं न जानासि नरमांसं विना कापालिकानां पूजा न भवतीति ?

कापालिकः—( नेपथ्ये ) कपालकुण्डले ! कपालकुण्डले !

( सन्त्रस्ता कपालकुण्डला सहसा निष्क्रान्ता )

नवकुमारः—( विस्मितः ) अये अन्तर्हिता रमणी ! किं नु खल्वियं कापालिकस्य माया ! अथवा ममैव मतिभ्रमः ! यत् श्रुतं तत्तु आशङ्काजनकम् । ( विचिन्त्य ) कथं वा आशङ्का ! कापालिको ऽपि मानवः, अहमपि मानवः । अतस्तत्कुटीरमेव यास्यामि ।
( निष्क्रान्तः )

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


## तृतीयं दृश्यम्

( वनपथेन प्रविशति काचन भैरवी )

भैरवी—( गायति ) नियतिविजेता को वा ।
रामो रघुपतिरलभत यां गतिमिह वद वेत्ति न को वा ।
नलोऽपि भूपतिरतिनिर्मलमतिरभजत दैन्यमशेषम् ।
पाण्डुसुतानां धर्मरतानां वृत्तं वेत्ति न को वा
सुरपतिरिन्द्रः कमलोपेन्द्रः सर्वे विधिवशमाप्ताः ।
कापालिकवरकरगतभूसुरमवितुमिहास्ते को वा ॥

( निष्क्रान्ता )

---

## चतुर्थं दृश्यम्

[ सागरतटे महाश्मशानम् । ]

( ततः प्रविशतः प्रज्वलिताग्निसमीपे ध्यानमग्नः कापालिकः यूपबद्धो नवकुमारश्च कपालकुण्डला सहसा प्रविश्य खड्गं चोरयित्वा निष्क्रान्ता )

कापालिकः—( स्तौति )
प्रेतारूढ़ातिभीमा प्रकटितदशना प्रेतसंस्थालयस्था
दिग्वस्त्रा खड्गहस्ता मृतकररसना चण्डचण्डाट्टहासा ।
बालार्काकारनेत्रा प्रलयघननिभा मुण्डमालां दधाना
वीराणां सिद्धिदैका जगति विजयते कालिका घोररावा ॥

( स्तवान्ते समुत्थाय कापालिकः नवकुमारसमीपं गत्वा तस्य ललाटे सिन्दूरतिलकं कण्ठे च रक्तमाल्यं ददाति नवकुमारश्च बन्धनमुक्तये यतते )

कापालिकः—( विहस्य ) ! मूर्ख ! कथं बलं प्रकाशयसि ? अद्य ते सफलं जन्म । भैरवीपूजायां ते मांसम् उपहरिष्यामि । इतोऽप्यधिकं त्वादृशस्य जनस्य किमस्ति सौभाग्यम् । ( खड्गमादातुकाम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


स्तमनधिगम्य विस्मितस्तदन्वेषणं नाटयति ) अये सायं समानीतः खड्गो यथास्थानमेव न्यस्तः न तु स्थानान्तरं प्रापितः। तत् कुत्र गतः स खड्गः! ( विचिन्त्य ) कपालकुण्डले! कपालकुण्डले! ( द्रुतं निष्क्रान्तः )

नवकुमारः—( आत्मगतम् ) अहो प्रत्यासन्नमिव मे मृत्युं पश्यामि। अति हि नाम दृढ़ाः खल्वेताः शुष्का लताः। बन्धनमपि सुदृढ़मेव। तत् किमधुना करिष्यामि मन्दभाग्यः।

हा मातः सुतवत्सले न च पुनर्द्रक्ष्याम्यहं ते मुखं
हा तात त्रिदिवालय स्वतनुजं पश्यापदा संयुतम्।
हा रम्यप्रियजन्मभूतल न ते लप्स्ये पुनर्दर्शनं
हा देवाः परिपूजिता अपि चिरं किं साम्प्रतं निर्घृणाः॥

( पदशब्दश्रुतिमभिनीय ) अये सैकतभूमौ श्रूयते पदशब्दः। नूनं दुरात्मा कापालिको मां हन्तुं इत एव आगच्छति। तदेतस्मिन् विजने महाश्मशाने को नु खलु मे त्राता भविष्यति?

कपालकुण्डला—( प्रविश्य खड्गहस्ता ) तुष्णीं तिष्ठ। ( बन्धनं छित्वा ) माम् अनुसर। ( नवकुमारेण सह निष्क्रान्ता )

( ततः प्रविशति क्रुद्धः कापालिकः )

केन मे चोरितः खड्गः कस्य नो जीवितं प्रियम्।
आशीविषस्य वदनात् दंष्ट्रां को हर्तुमिच्छति॥

हन्त अतिक्रामति मातुरर्च्चनाकालः। किन्तु खलु करिष्ये? भवतु—( त्रिशूलमादाय )

अनेनैव त्रिशूलेन विदार्य नृपशोरुरः।
रुधिरैस्तर्पयिष्यामि चण्डिकां रुधिरप्रियाम्॥

( नवकुमारं हन्तुम् उद्यतस्तमनासाद्य विस्मितः ) अये कथं न दृश्यतेऽसौ बध्यो विप्रः। छिन्नं लताबन्धनं भूमौ पतितमास्ते। तन्नूनमिदं चेष्टितं कपालकुण्डलायाः। आः पापे!

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


विघ्नं समुत्पाद्य ममाद्य रात्रौ, समर्च्चनायां वत चण्डिकायाः।
उल्लङ्घ्य कान्तारमिदं सुभीमं क यास्यसि त्वं मयि जागरूके॥

( निष्क्रान्तः )

---

## पञ्चमं दृश्यम्

### अधिकारिगृहस्थितं कालिकामन्दिरम्

( ततः प्रविशति कपालकुण्डलया सह देव्यभिमुखमासीनोऽधिकारी )

कपालकुण्डला—( स्तौति )

श्मशाने वसन्तीं करालोग्रदंष्ट्रां
महामेघनीलप्रभां भीमवेशाम्।
निकृत्तारिमुण्डैर्निबद्धां सरक्तां
पदाब्जं स्पृशन्तीं दधानां सुमालाम्॥

शवाकारमृत्युञ्जयन्यस्तपादाम्
असिं धारयन्तीं वराभीतिहस्ताम्।
शिवां लोलजिह्वां वहन्तीं हसन्तीं
प्रपन्नास्मि कालीं जगत्तारयन्तीम्॥

(स्तवान्ते देवीं प्रणम्य) तात! साम्प्रतम् अनुजानीहि मां कापालिक-समीपगमनाय। ( इति उत्थातुम इच्छति )।

अधिकारी—मातः क्षणं तिष्ठ। कापि मे प्रार्थना वर्त्तते।

कपालकुण्डला—(उपविश्य) तात! आज्ञापय।

अधिकारी—आ-दर्शनादेव त्वाम् अहं मातृशब्देन सम्बोधयामि। त्वयि मे मातुरप्यधिकः स्नेहः। तत न मे प्रार्थनम् अवधीरणीयम्।

कपालकुण्डला—न अवधीरयिष्यामि ते वचनम्।

अधिकारी—न पुनस्त्वया तत्र गन्तव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


कपालकुण्डला—कथं नाम ?

अधिकारी—तत्र गतायास्तव नास्ति क्षेमम् ।

कपालकुण्डला—तदहं जाने ।

अधिकारी—तत् कथं यास्यसि ?

कपालकुण्डला—कुत्र वा यास्यामि ?

( क्रमशः )

---

श्रीलकृष्णदासकविराजगोस्वामिप्रणीत-

## श्रीचैतन्यचरितामृतस्य संस्कृतानुवादः

अनुवादकः—श्रीभास्करानन्दसरस्वतीस्वामी

### श्रीचैतन्यचरितामृते मध्यलीलायां

प्रथमः परिच्छेदः

( पूर्वानुवृत्तः )

पथि नानाविधा लीला देवसन्दर्शनं तथा ।
माधवेन्द्रस्य गोपालस्थापनक्षीरचौर्ययोः ॥
वृत्तान्तश्रवणं साक्षिगोपालस्य तथाद्भुतम् ।
नित्यानन्देन दण्डस्य भञ्जनञ्च महाप्रभोः ॥
स ययौ क्रुद्ध एकाकी श्रीजगन्नाथमीक्षितुम् ।
पश्यन्नेव जगन्नाथं मूर्च्छितो न्यपतद्भुवि ॥
सार्वभौमस्तथा दृष्ट्वा स्वगेहमनयत् प्रभुम् ।
तृतीये प्रहरे तत्र लब्धसंज्ञोऽभवच्च सः ॥६०
मुकुन्दो जगदानन्दो नित्यानन्दश्च तत्परम् ।
दामोदरश्च तत्रेत्य मिलितास्तेन नन्दिताः ॥

२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सार्वभौमे प्रसादं स कृतवांश्च ततः प्रभुः ।
तस्मै सन्दर्शयामास निजमैश्वरविग्रहम् ॥
दाक्षिणात्यप्रदेशाय ततः प्रस्थितवान् प्रभुः ।
कूर्मक्षेत्रे चकारासौ वासुदेवविमोचनम् ॥
प्रभुर्नृसिंहमस्तौषीन्नृसिंह-जियड़े पुरे ।
प्रतिमार्गं प्रतिग्रामं चक्रे नामप्रवर्त्तनम् ॥
गोदावरीतटारण्ये तस्य वृन्दावनभ्रमः ।
श्रीरामानन्दरायेण तत्रैवाभूच्च मेलनम् ॥
त्रिमल्ल-त्रिपदीस्थानं प्रभुणा समदृश्यत ।
समन्ताद्विहितं तेन कृष्णनामप्रचारणम् ॥
कृत्वा पाषण्डिनां व्यूहदलनञ्च ततः प्रभुः ।
अहोवलनृसिंहादि-दर्शनं कृतवान् पथि ॥
श्रीरङ्गक्षेत्रमागत्य कावेरीतटसंस्थितम् ।
श्रीरङ्गदेवमालोक्य प्रेम्णासौ विह्वलोऽभवत् ॥
ततस्त्रिमल्लभट्टस्य समागत्य निकेतनम् ।
वर्षासु चतुरो मासांस्तत्रैव न्यवसत् प्रभुः ॥
त्रिमल्लभट्ट आसीच्च वैष्णवः पण्डिताग्रणीः ।
पाण्डित्येन तथा प्रेम्णा प्रभोः सोऽभूत् सुविस्मितः ॥१००
चातुर्मास्यं प्रभुस्तत्र श्रीवैष्णवजनैः सह ।
अनयन्नृत्यगीतेन कृष्णसंकीर्त्तनेन च ॥
दाक्षिणात्ये पुनर्यात्रा चातुर्मास्यान्तरे प्रभोः ।
श्रीपुरीपरमानन्दस्तेन तत्रैव सङ्गतः ॥
भट्टमारीपुरात् कृष्णदासश्च प्रभुणोद्धृतः ।
रामजापि-द्विजास्येन कृष्णनाम प्रचारितम् ॥
स श्रीरङ्गपुरीसङ्गं तत्रैव कृतवान् प्रभुः ।
रामदासाख्यविप्रस्य चक्रे दुःखविमोचनम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


कृतस्तत्त्वविचारश्च प्रभुणा तत्त्ववादिभिः ।
बुद्धिहीनममन्यन्त स्वात्मानं सर्व एव ते ॥
अनन्तं वासुदेवञ्च पद्मनाभं जनार्दनम् ।
पुरुषोत्तमदेवञ्च दृष्टवान् श्रीमहाप्रभुः ॥
प्रभुर्विहितवांस्तत्र सप्ततालविमोचनम् ।
सेतुबन्धेऽथ सस्नौ च श्रीरामेश्वरमैक्षत ॥
तत्रैव श्रुतवान् कूर्मपुराणं स महाप्रभुः ।
रावणेन हृता माया-सीतेति तत्र वर्णितम् ॥
तदाकर्ण्य प्रभोश्चित्तमासीदानन्दविह्वलम् ।
श्रीरामदासविप्रोऽसौ तस्य स्मृतिपथं गतः ॥
तत्पुरातनपत्रञ्च तदानीमाग्रहेण सः ।
दर्शयन् रामदासस्य मनोदुःखमखण्डयत ॥११०
कर्णामृतं तथा ब्रह्मसंहितां नाम पुस्तके ।
द्वे प्राप्य चोत्तमे ज्ञात्वा गृहीत्वा चानिनाय ते ॥
पुनर्नीलाचलं गत्वा निजभक्तजनैः सह ।
मिलित्वा च जगन्नाथस्नानयात्रां ददर्श सः ॥
अलब्ध्वाऽनर्हकालेऽसौ जगन्नाथस्य दर्शनम् ।
आलालनाथमागच्छत्तद्वियोगेन दुःखितः ॥
दिवसान् कतिचित्तत्र तस्थौ भक्तजनैः समम् ।
गौड़भक्ताः समायाता इति वार्त्ताञ्च सोऽश्रृणोत ॥
नित्यानन्दप्रभुस्तत्र गत्वा साग्रहमानसः ।
महाप्रभुं समादाय नीलाचलमथागमत ॥
नक्तन्दिवं निनायासौ विरहार्त्तो यदा प्रभुः ।
तदा भक्तजनाः सर्वे गौड़ेभ्यस्तमुपाययुः ॥
मन्त्रयित्वा समं सर्वैः समारब्धे च कीर्त्तने ।
सङ्कीर्तनसमाविष्टः स्वस्थचित्तोऽभवत् प्रभुः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामानन्दं यदा पूर्वमुपतस्थे महाप्रभुः ।
तदा नीलाचले तस्यागमनाय तमादिशत ॥
कालेन कियता राज्ञो लब्ध्वाज्ञां स उपागतः ।
कृष्णालापमहोरात्रं तेनैव कृतवान प्रभुः ॥
अथ प्रद्युम्नमिश्राद्यैर्मिलनञ्च प्रभोः कृपा ।
काशीमिश्रे, पुरीस्वामिपरमानन्दसङ्गमः ॥१२०
गोविन्देन तथा काशीश्वरेण मेलनं प्रभोः ।
दामोदरस्वरूपेण शिखिमाहितिना तथा ॥
श्रीभवानन्दसङ्गश्च गौडेभ्यो वैष्णवागमः ।
प्रथमं मेलनं तावत कुलीनग्रामवासिभिः ॥
श्रीनरहरिदासाद्या यावन्तः खण्डवासिनः ।
ते सर्वे प्रभुमागच्छन शिवानन्देन सङ्गताः ।
स्नानयात्रां निरैक्षन्त भक्तास्ते प्रभुणा सह ।
सर्वानादाय तांश्चक्रे गुण्डिचामार्जनं प्रभुः ॥
रथयात्रां ददर्शाथ सर्वैर्भक्तजनैः समम् ।
नृत्यं कृत्वा रथस्याग्रे तैरुद्यानं जगाम च ॥
कृपां प्रतापरुद्रे च तत्रैव कृतवान प्रभुः ।
प्रतियानदिने भक्तान गौडीयानादिदेश च ॥
'रथयात्रावलोकार्थमायात प्रतिवत्सरम्' ।
इत्युक्त्वासौ छलेनैव भक्तसङ्गमयाचत ॥
सार्वभौमगृहे भिक्षा परिपाटीयुता प्रभोः ।
षाठ्या माताब्रवीद् यत्र षाठी मे विधवास्त्विति ॥
वर्षान्तेऽद्वैतमुख्यानां भक्तानामागमः पुनः ।
चक्रे यत्र शिवानन्दः सर्वेषां पर्यवेक्षणम् ॥

( क्रमशः )

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# योगिभक्तचरितम्

( काव्यम् )

(निबन्धकः—श्रीकाश्यपकविः)

## द्वितीयः सर्गः

( पूर्वानुवृत्तमः )

माता तस्माद्दूर्ध्वमासीत् सकामा तस्योद्वाहे तत्प्रतीकारबुद्धया ।
नारीयोगो योगिनामप्यभीक्ष्णं प्रायो लोके संसृतौ रागहेतुः ॥५१

कन्यां काञ्चित् काञ्चनाभां सुशीलां योग्यां तस्यालक्षयत सा तदर्थम् ।
तामालक्ष्य ज्योतिषज्ञो नगेन्द्रः सा वैधव्यं यास्यतीत्याख्यदम्बाम् ॥५२

माता भीतानिष्टयोगात सुतस्य कन्यामेनां वर्जयामास तस्मात ।
यान्येनोढा किञ्चिदूर्ध्वं यथार्थं प्राप्ता दृष्टा दुष्टवैधव्यकष्टम ॥५३

माता तस्मादुत्तरं तद्विवाहे नैवोत्साहं दर्शयामास भीता ।
येनाविघ्नं श्रीनगेन्द्रस्य तावत् स्थैर्य्यं लेभे ब्रह्मचर्यस्य चर्या ॥५४

अथ स नियमचारी धर्म्यनीतिप्रचारी
सुकृतनियमजातं नात्मनैवान्वतिष्ठत ।
मनुजनिकरमन्यं धर्ममार्गं विनेतुं
विविधविधिमधत्त क्षेमशिक्षाविधानैः ॥५

इति योगीभक्तचरित-काव्ये
द्वितीयः सर्गः ।

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


## तृतीयः सर्गः

ग्रामे तत्र कृषीवलादिबहुले ज्ञानप्रभावर्जिते
व्याहन्तुं तमसस्ततिं मतिमतां मान्यो नगेन्द्रस्तदा ।
स्वीये वासगृहे नृणामभिमतज्ञानप्रभादीप्तये
प्रत्यष्ठापयदुत्सुकेन मनसा विद्यालयं क्षेमदम् ॥१

स्वेनैव द्रविणेन दीनबहुले ग्रामे तदङ्गोच्चयं
संगृह्य प्रततान लोकनिवहे शिक्षामसौ शिक्षितः ।
तस्यान्येऽपि सहोदराः कृतिवरास्तत्रानुकूल्यं व्यधुः
शिक्षा समप्रससार तत्कृतिवशात् सार्द्धं जनानां मुदा ॥२

तत्रावैतनिके नयैकशरणे विद्यालये भूयसां
विद्याकामिनृणां तदा समभवद् बाहुल्यमत्युल्वणम् ।
ग्रामस्तेन दधार रूपमपरं विद्यार्थिनामागमात्
प्रारब्धस्तमसः क्षयो जनहृदामानन्दसंवर्द्धनः ॥३

तद्विद्यालयकीर्तिमुज्ज्वलतमां श्रुत्वा सुदूराज्जनाः
विद्याया ग्रहणार्थमत्र मिलिता जाताः कृतार्थश्रमाः ।
ख्यातिस्तस्य तदा प्रभृत्यनुदिशं तत्रापि दूरान्तरे
जाता शिक्षक इत्यशेषविदुषो नैपुण्यमासेदुषः ॥४

ग्रन्थाध्यापनमात्रमत्र न कृतं ज्ञानार्थमध्यापकैः
शीलञ्चापि सुसंस्कृतं समभवद् विद्यार्थिनां शिक्षया ।
धर्मे शर्मकरे यथा हि मनुजा विन्दन्ति बुद्धिप्रभां
तद्वृत्तेन कथोपदेशनियमः प्रावर्ति पाठाद् बहिः ॥५

नो ग्रन्थार्थनिवेदनेन सफलं सच्छिक्षकाणां व्रतं
शीलं शोधयतां कृतिः फलवती विद्यार्थिनां भूतये ।
तत्तत्त्वं प्रविजानता मतिमता तेनाततं शिक्षणं
तद्विद्यानिलयस्य कीर्तिविशदं कञ्चिद् विशेषं व्यधात् ॥६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यस्मिन्नास्ति विशेष एष हितकृद् विद्यालये देहिनां
सोऽयं निष्फलतामलं प्रवृणुते तस्य क्रिया निष्फला।
काले तत्र यतो हि भारतभुवो विद्यालयेष्वन्वहं
शिक्षा निष्फलतमधत्त वहुषु प्रायेण विद्यार्थिनाम् ॥७

दुष्काले धनमेव मूढ़मनुजैः शिक्षाफलं मन्यते
धर्माधर्मविवेचनाच्चति लयं दूरे समाजस्थितिः।
नेतारः प्रथयन्ति धर्मरहितं राज्यं शुभस्यास्पदं
धर्मं केचन भावयन्ति न शिवं प्राप्या यतो दुर्गतिः ॥८

धर्मो रक्षति रक्षितो भुवि नरानित्यस्ति शास्त्रोदितम्
प्रोक्तः शास्त्रचयः प्रमाणपुरुषैर्नो वक्ति मिथ्या क्वचित्।
कार्याकार्यविचारणा हि कुशलैः कार्या तदालोकनात्
विज्ञानं तदपेक्षितं स्थितिकृते शास्त्रोक्तवस्तुस्रजाम् ॥९

शिक्षायाः प्रसृतिं विना जनिमतां सम्भाव्यते नैव तत
तस्मादेव नगेन्द्रनाथसुकृती शिक्षां परां भावयन्।
विद्यां शिक्षयति स्म मानवगणं धर्मावदातां चिरम्
विद्याचारसमृद्धिरेव नियतं कल्याणकृत् सर्वतः ॥१०

पाण्डित्येन समं सुशिक्षणविधौ दाक्ष्ये तदीये ततः
प्रख्याते बहुदूरतोऽपि बहवो ज्ञानर्थिनः सङ्गताः।
तद्वक्त्रादुपदेशवाङ्मयसुधामास्वाद्य तृप्ता भृशं
स्वीयाध्यात्मिकवर्त्मनि प्रतिगताः प्रज्ञाबलादुन्नतिम् ॥११

दाक्ष्ये तस्य सुविश्रुते बहुमते चान्यत्र विद्यालये
शिक्षायां स बुधः प्रधानतमतां नीतः समभ्यर्थितः।
स्वीयागारगतस्य चापि महतो विद्यालयस्य क्रियां
न्यस्य भ्रातृयुगे जगाम कुशलः स्थानान्तरं श्रेयसे ॥१२

कालं कञ्चन तत्र साधुनियमैर्विद्यार्थिनां शिक्षया
रीतिं क्षेमतमां प्रवर्त्य सुकृती शिक्षाविधौ स्वाहिताम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

080524
Digitized by Arya Samaj Foundation Chennai and eGangotri


प्रत्यावृत्तिमसौ चकार भवने स्वीये पुनः स्वेच्छया
लोकातीतमुदं गताः पुनरमुं सम्प्राप्य सर्वे जनाः ॥१३

तद्विद्यालयकृत्यसाधनकृते सोऽयं धनं नाददे
रीतिः कापि समुन्नता च महता शिक्षाविधौ वर्तिता ।
तस्यामायिकचारुशीलमभवल्लोकप्रियं मङ्गलं
योगादावपि कापि शक्तिरजनि त्यागव्रतं शाश्वतम् ॥१४

पीयूषादधिकं वचः सुमधुरं सत्यानुरक्तिः परा
देवब्राह्मणयोरनन्यसुलभा श्रद्धा सतां मानना ।
शक्त्या वेदपुराणसम्मतविधेः सर्वस्य संसाधना
नित्यं तस्य परोपकारपरता दिव्या विभूतिस्तथा ॥१५

तद्विद्यालयकृत्यसाधनरते तस्मिन्नमुत्र स्थिते
यान्येतानि नृणां सुखाय हि पुरा जातानि तत्सङ्गिनाम् ।
तान्येवास्य वियोगतः स्मृतिपथे पान्थायमानान्यहो
तेषां तत्प्रणयस्पृशां समभवन् दुःखाय मर्मच्छिदे ॥१६

प्रत्यष्ठापयदेष धर्मसमितिं गेहे स्वकीये ततः
यत्राध्यात्मिकतत्त्वजातममलं व्याचष्ट सोऽत्यादरात् ।
बालानामपि बुद्धियोग्यवचनैर्दुर्ज्ञेयतत्त्वोच्चयं
व्याख्याय प्रथितोऽभवत् स सुतरां व्याख्याकृतामुत्तमः ॥१७

तद्व्याख्यानगुणेन कृष्टमनसः संख्यातिगा मानवाः
नास्तिक्यं परिहाय निर्मलहृदो जाताः क्रमेणास्तिकाः ।
हित्वा धर्ममतान्तरं कुलगते धर्मे स्थिरत्वं गताः
ज्ञात्वा तत्वचनेन मङ्गलमयं स्वं धर्ममिष्टप्रदम् ॥१८

( क्रमशः )

080524

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahopadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Rama nath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A. Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkaharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16 **Yatratattvam** of Raghunandana Bhāttacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakravarti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). (Out of stock)

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof. Chintaharan Chakra varti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members),

24. **Sataranja Kutuhalam**—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam** (a new Mahakavya) of MM. Kalipada Tarkacharya, Rs, 5 ;Rs, 4-8 (for members).

26. **Sukhalekhanam** of Bharata Sena, Edited by Pt. Ramdhan Sastri. Re 1—8:—Re 1—4: (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# विज्ञापनम्

## विशेषतो द्रष्टव्यम्

संस्कृतसाहित्यपरिषदः चतुःषष्ट्यधिकत्रयोदशशततम-( १३६४ ) वङ्गाब्दी वार्षिकं मूल्यं ( Annual Subscription ) यैर्ग्राहकमहोदयैरेतावत्कालपर्यन्तं न परिशोधितं, तैः कृपया सत्वरं तत् प्रेषणीयम्। अन्यथा (V. P.) डाकयोगेन प्रेरणे व्ययाधिक्यं भविता। अतः परं यैस्तावदस्याः परिषदः सदस्यपदावस्थानं ने[illegible]यं तूर्णं विज्ञापनीयाः। इति—

विनीत—संस्कृत-साहित्य-परिषत्-सम्पादकानाम्

१६८।१, राजा-दीनेन्द्रष्ट्रीट्,

संस्कृतसाहित्यपरिषद्-भवनम्, कलिकाता—४

---

## अधस्तनग्रन्थाः

### सद्य एव प्रकाशिता भवितारः

१। हलायुध-प्रणीतं ब्राह्मण-सर्वस्वम्। अध्यापक—श्रीदुर्गामोहन भट्टाचार्य एम. ए. सांख्यतीर्थ-सम्पादितम्।

२। माणवक-गौरवम्—म. म. श्रीकालीपदतर्काचार्यप्रणीतमपूर्वमभिनयोपयोगिनाटकम्।

३। कपालकुण्डलारूपकम्—अध्यापक—श्रीविष्णुपद भट्टाचार्य एम. ए. काव्यतीर्थसङ्कलितमभिनयोपगिरूपकरत्नम्।

४। चित्रचम्पूः—वाणेश्वरविद्यालङ्कारकृता—अध्यापक—श्रीजानकीनाथ-शास्त्रिसम्पादिता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri